पूर्वे भुंक्ते ॥ अन्ये तु यथाश्रुतमाहुः ॥ गोतमश्च ॥ शूद्रश्चतुर्थो वर्ण एकजातिस्तस्य सत्यमक्रोधः शौचम
नाचमनार्थे पाणिपादप्रक्षालनमेवैके श्राद्धकर्म भृत्यभरणं स्वदारवृत्तिः परिचर्या चोत्तरेषामनुज्ञातोऽस्य नमस्कारो मंत्रः पाकय
ज्ञैः स्वयं यजेतेत्येके इति पाकयज्ञैरष्टकादिभिः ॥ स्वयं यजेत न त्विग्गादिभिरिति तत्कार्ष्णे स्वय
मिति पत्नीपुत्रादिव्यावृत्त्यर्थमिति लक्ष्मीधरः ॥ एके ऽनुक्ते विप्राद्दारापि प्रतिष्ठन्ते इत्युक्तमन्त्र
त्राक्तेः स्वयमशक्तस्तु विप्रद्वारा समाचरेत् स्वयमसक्तौ विप्रद्वारेत्यजपयः ॥ हेमाद्रौ भारते श्राद्धकृ
र्मेन्द्रयोश्चैव सत्यमक्रोध एव च स्वेषु दारेषु संतोषः शौचं नित्यानसूयता ॥ आत्मज्ञानं तितिक्षा च धर्मः
साधारणो नृप चातुर्वर्ण्यस्येति शेषः ॥ ब्रह्मपुराणे च वर्णानां ज्ञानं श्रौतस्य इति नियमस्तु द्विजप
र इति प्रेतहेमाद्रिः ॥ भगवद्गीतासु मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ॥ स्त्रियो वैश्यास्तथा शूद्रा
स्तेऽपि यांति परां गतिं ॥ हेमाद्रौ विष्णुः ॥ क्षमा सत्यं दमः शौचं दानमिन्द्रियसंयमः ॥ अहिंसा गुरुशुश्रू २४

71/1951

षा तीर्थानुसरणं दया ॥ आर्जवं लोभशून्यत्वं देवब्राह्मणपूजनं ॥ अनभ्यसूया च तथा धर्मः सामान्य उ
च्यते ॥ तद्वन्निमात्रं तु मनुः पराशरौ ॥ शुश्रूषैव तु शूद्रस्य धर्मो नैःश्रेयसः परः ॥ शुचिरुत्कृष्टशुश्रूषु
र्मृदुवागनहंकृतः ब्राह्मणाद्याश्रयो नित्यमुत्कृष्टां जातिमश्नुते ॥ शूद्रस्तु वृत्तिमाकाङ्क्षन् क्षत्रमारा
धयेद्यदि ॥ धनिनं वाप्युपाराध्य वैश्यं शूद्रो जिजीविषेत् ॥ क्षत्रादिसेवाहीनैरेव विप्रसेवया धर्मोऽपी
त्यर्थः ॥ स्वर्गार्थमुभयार्थं वा ब्राह्मणानेवाराधयेत् ॥ विप्रसेवैव शूद्रस्य विशिष्टं कर्म कीर्त्यते ॥ यद
तोऽन्यद्धि कुरुते तद्भवत्यस्य निष्फलं ॥ विप्रसेवाविनाकृतमपि लाभनदानाद्यकृतमित्यर्थः ॥ स्वेष्वपसा
दः ॥ प्रकल्प्या तस्य तैर्वृत्तिः स्वकुटुंबाद्यथार्हतः ॥ शक्तिं चावेक्ष्य दाक्ष्यं च भृत्यानां च परिग्रहं ॥ तैर्द्विजैः
केर्त्वक्वरसोपालननाय ऽतिमेधातिथिः ॥ उच्छिष्टमन्नं दातव्यं जीर्णानि वसनानि च ॥ पुलाकाश्चैव धा
न्यानां जीर्णाश्चैव परिच्छदाः ॥ पुलाका धान्यकणाः ॥ उच्छिष्टं भुक्तशिष्टं भोजनस्येति मेधातिथिः ॥ गोतमः ॥
तेषां वृत्तिर्लिप्सेत जीर्णान्युपानच्छत्रवासः कूर्चादीन्युच्छिष्टाशनं शिल्पवृत्तिश्च यं चार्यमाश्रये भ

शू०
२५

त्र्यंबकेन शूद्रेणाचोक्तस्तदर्थोस्यानिश्चयः स्यादिति ॥ श्रीगोहत्रिहीनलिनार्पणान्त्र्यंबकेन शूद्रेण
चोत्तरण्यापोनत्रोम इत्यर्थः ॥ उच्छिष्टस्थानेराममपरंस्त्रमेतु उच्छिष्टमन्त्रेदातव्यं शूद्राया गृहमेधिने ॥ गृ
हस्थायपतु दातव्यमन्त्रमेव दिने दिने इति व्याघ्रोक्तेः उच्छिष्टनिषेधे गृहस्थपरत्वात् ॥ अमन्त्रकेन स्त्रीप्यवं
॥ तथा तपः शूद्रस्य सेवनं ॥ याज्ञवल्क्यः ॥ शूद्रस्य द्विजशुश्रूषा तयाजीवन्वणिग्भवेत् ॥ शिल्पैर्वा वि
धैर्जीवेद्द्विजातिहितमाचरन् ॥ नृसिंहपुराणे ॥ अयाचितप्रदाता स्यात्कृषिं वृत्त्यर्थमाश्रयेत् ॥ पुरा
णं शृणुयान्नित्यं नरसिंहस्य पूजनं ॥ छशानाम् ॥ शूद्रस्य द्विजशुश्रूषा सर्वशिल्पानि वाप्यथ ॥ विक्र
यः सर्वपण्यानां शूद्रधर्म उदाहृतः ॥ शूद्रधर्मास्त्रिवर्णशुश्रूषा कलत्रादिपोषणं कर्षणं पशुपाल
नं भारोद्वहनं पण्यव्यवहारश्चित्रकर्म नृत्यगीतं वेणुमुरजवादनादीनि मनुः ॥ अशक्नुवंस्तु शुश्रू
द्वि षां शूद्रः कर्तुं द्विजन्मनां ॥ पुत्रदारात्ययं प्राप्तो जीवेत्कारुककर्मभिः ॥ यैः कर्मभिः प्रचरितैः शुश्रूष्यं
ते द्विजातयः ॥ तानि कारुककर्माणि शिल्पानि विविधानि च ॥ कुर्यादिति शेषः ॥ नृसिंहपुराणे ॥ शूद्रेण तु

73
1951

शूद्रेणापचरेद्ब्राह्मणोग्निरिवज्वलन् ॥ एवं धर्माचरणे लोके महापैठीनसिः ॥ गांधर्वे शूद्रस्यस्या
न्नमित्यर्थः ॥ इति राममकृष्णभट्टसुतकमलाकरभट्टकृते शूद्रधर्मकमलाकरे शूद्राणां विहितनि
षिद्धानि ॥ अथ शूद्रस्य संस्कारप्रयोगः ॥ तत्रादौ सर्वकर्मागत्वात्पुण्याहवाचनमाचारात्तु सा
रेणोक्तो मात्स्ये ॥ संपूज्य गंधमाल्याद्यैर्ब्राह्मणान्स्वस्तिवाचयेत् ॥ धर्मकर्मणि मांगल्ये संग्रामा
द्भुतदर्शने यमः ॥ ओंकारं ब्राह्मणे कुर्यान्नोंकारं महीपतौ ॥ उपांशुं च तथा वैश्ये स्वस्तिशूद्रेषु की
र्तयेत् ॥ कर्ताचम्यसुमुखश्चैकदंतश्चेत्यादि स्मृत्वा देशकालौ संकीर्त्य अमुककर्म करिष्ये ॥ तदंगतया ग
णेशपूजनं पुण्याहवाचनं करिष्ये इति संकल्प्य गणेशं पूजयेत् ॥ यथा ॥ हे हेरंब त्वमेह्येहि अंबिका
त्र्यंबकात्मज ॥ सिद्धिबुद्धियुतत्र्यक्ष सर्वलोकपितः पितः ॥ नागास्यनागहारत्वं गणनाथ चतुर्भु
ज ॥ नक्षिन ॥ स्वायुधैर्दिव्यैः पाशांकुशपरश्वधैः ॥ आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः ॥ इह
गत्य गृहाण त्वं पूजां रक्ष च मे क्रतुं ॥ इत्यावाह्य षोडशोपचारैः संपूज्य ॥ पात्रे सकलं मम मायाद्य ॥ रक्ष

मृ.प्र०
२६

रक्षगणाध्यक्ष त्र्यक्ष त्रैलोक्यरक्षक॥ वरदस्त्वं वरं देहि वांछितार्थं नरोत्तम॥ अनेन फलदानेन फल
दो भव मे सदा॥ इत्यर्घं दत्वा॥ वक्रतुंड महाकायेति प्रार्थयेत्॥ आयुष्मा विघ्नेश्वराय वरदाय सुरप्रियाय लं
बोदराय सकलाय जगद्धिताय ते नमः॥ नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गण
नाथ नमो नमस्ते॥ भक्तार्तिनाशनपराय गणेश्वराय सर्वेश्वराय शुभदाय सुरेश्वराय॥ विद्याधराय वि
कटाय च वामनाय भक्तप्रसन्नवरदाय नमो नमस्ते॥ नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः नम
स्ते रुद्ररूपाय करिरूपाय ते नमः॥ प्रार्थना॥ ततः स्वाग्रे धान्यराशिद्वये कलशे संस्थाप्य तत्र गंध
दूर्वाचंपकपल्लवफलहेमपंचरत्नादि निक्षिप्य धान्यपूर्णपात्रद्वयं न्यस्य तत्र॥ पाशहस्तं वरुणं या
दसांपतिमीश्वरं आवाहयामि यज्ञेस्मिन् पूजेयं प्रतिगृह्यतामिति वरुणमावाह्य॥ संपूज्य कल
शस्य मुखे विष्णुरित्याद्यैः संप्रार्थ्य मातृदेवो भव॥ पितृदेवो भव आचार्यदेवो॥ अतिथिदेवो॥ आ
शिषः प्रार्थयेत्॥ एताः सत्या आशिषः संतु अवनिकृतजानुमंडलः कमलमुकुलसदृशमंजलिं

75
1951

शिरस्याधाय दक्षिणेन पाणिना सुवर्णपूर्णकलशं धारयित्वा॥ दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुप
दानि च तेनायुः प्रमाणेन पुण्याहं दीर्घमायुरस्तु॥ शिवा आपः संतु सौमनस्यमस्तु॥ अक्षतं चारि
ष्टं चास्तु॥ गंधाः पांतु सुमांगल्यं चास्तु॥ अक्षताः पांतु आयुष्यमस्तु॥ पुष्पाणि पांतु सौश्रियमस्तु॥
तांबूलानि पांतु ऐश्वर्यमस्तु॥ दक्षिणाः पांतु बहुदेयं चास्तु इति विप्रहस्ते दत्वा॥ यं कृत्वा सर्ववेदय
ज्ञक्रियाकरणकर्मारंभाः शुभाः शोभनाः प्रवर्तंते तमहं नतो भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाच
यिष्ये वाच्यतामिति ते ऋक्॥ मा विघ्नं मा च मे पापं मा संतु परिपंथिनः॥ सौम्या भवंतु सुखिनः सर्वलो
काः सुखावहा इति कृत्वा विहिता॥ विप्राः स्वस्त्यस्तु॥ करोतु स्वस्ति ते ब्रह्मा स्वस्ति चापि द्विजातयः
॥ सरीसृपाश्च ये श्रेष्ठास्तेभ्यस्ते स्वस्ति सर्वदा॥ ययातिर्नहुषश्चैव धुंधुमारो भगीरथः॥ तुभ्यं रा
जर्षयः सर्वे स्वस्ति कुर्वंतु नित्यशः॥ स्वस्ति तेस्तु द्विपादेभ्यश्चतुष्पादेभ्य एव च॥ स्वस्त्यस्त्वपादके
भ्यश्च सर्वेभ्यः स्वस्ति ते सदा॥ स्वाहा स्वधा शची चैव स्वस्ति कुर्वंतु ते सदा॥ लक्ष्मी अरुंधती चैव कुरुतां स्व

।स्मृ.पु०
२७

स्तितेन घा॥ स्वस्ति नो देवलश्चैव विश्वामित्रस्तथांगिरा॥ वसिष्ठस्तितेश्च मयच्छंतु कार्त्तिकेयस्य षण्मुखः॥ वि
वस्वान्भगवान्स्वस्तिकरोतु नव सर्वदा॥ दिग्गजाश्चैव चत्वारः क्षितिश्च गगनं ग्रहाः॥ अधस्ताद्धर
णी योसौ नागो धारयते सदा॥ शेषश्च पन्नगश्रेष्ठः स्वस्तिं तुः संप्रयच्छतु इति वदेपुनः॥ ततः कर्त्ता आत्मनः
मन॥ समाधीयतां समाहितमनसः स्मः इति ते प्रसीदं तु भवंतः प्रसन्नाः स्मः इत्युक्त्वा कुंभजलं पातयन्
हेत्॥ शांतिरस्तु॥ पुष्टिरस्तु तुष्टिरस्तु॥ वृद्धिरस्तु॥ अविघ्नमस्तु॥ आयुष्यमस्तु॥ आरोग्यमस्तु॥ शिवक
र्मास्तु॥ कर्मसमृद्धिरस्तु॥ पुत्रसमृद्धिरस्तु॥ धनधान्यसमृद्धिरस्तु॥ इष्टसंपदस्तु॥ अरिष्टनिरसन
मस्तु॥ यत्पापं तत्प्रतिहतमस्तु॥ यच्छ्रेयः तदस्तु॥ उत्तरे कर्मण्यविघ्नमस्तु॥ उत्तरोत्तरमहरहरभिवृद्धिर
स्तु॥ उत्तरोत्तराः क्रियाः शुभाः शोभनाः संपद्यंतां॥ तिथीकरणमुहूर्त्तनक्षत्रसंपदस्तु॥ तिथिकरण
मुहूर्त्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयंतां॥ दुर्गापांचाल्यौ प्रीयेतां॥ अग्निपुरोगा विश्वेदेवाः प्रीयंतां॥ इंद्रपु २३
रोगा मरुद्गणाः प्री०॥ ब्रह्मपुरोगाः सर्वेवेदाः प्री०॥ वसिष्ठपुरोगा ऋषिगणाः प्री०॥ अरुंधतीपुरोगा एक

द

77
1951

पत्न्यः प्री०॥ ब्रह्म च ब्राह्मण्यश्च प्री०॥ श्रीसरस्वत्यौ प्रीयेतां॥ श्रद्धामेधे प्रीयेतां॥ भगवती कात्यायनी प्रीयं
तां॥ भगवती माहेश्वरी प्रीयंतां॥ भगवती पुष्टिकरी प्री०॥ भगवती तुष्टिकरी प्री०॥ भगवती वृद्धिकरी प्री
०॥ भगवंतौ विघ्नविनायकौ प्रीयेतां॥ भगवान्स्वामी महासेनः सपत्नीकः ससुतः सपार्षदः सर्वस्थानगतः
प्री०॥ सर्वग्रामदेवताः प्रीयंतां॥ सर्वाः कुलदेवताः प्रीयंतां॥ हताश्च ब्रह्मद्विषः हताः परिपंथिनः॥ हताश्च
स्य कर्मणो विघ्नकर्त्तारः शात्रवः पराभवं यांतु॥ शाम्यंतु घोराणि॥ शाम्यंतु पापानि॥ शाम्यंत्वीतयः शु
भानि वर्द्धतां॥ शिवा आपः संतु॥ शिवा ऋतवः संतु॥ शिवा अग्नयः संतु॥ शिवा ओषधयः संतु॥ शिवा व
नस्पतयः संतु॥ शिवा अतिथयः संतु॥ अहोरात्रे शिवे स्यातां॥ शुक्रांगारकबुधबृहस्पतिशनैश्चर
राहुकेतुसोमसहिता आदित्यपुरोगाः सर्वेग्रहाः प्रीयंतां॥ भगवान्नारायणः प्रीयंतां॥ भगवान्प
र्जन्यः प्रीयतां॥ स्वामी महासेनः प्रीयंतां॥ पुण्याहकालान्वाचयिष्ये वाच्यतां॥ ब्राह्मं पुण्यमह
र्यच्च सृष्ट्युत्पादनकारकं॥ वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवंतु नः॥ दीयंते यत्र दानानि पूज्यंते च द्विजात

श.रु.
२८

ये कृत्पते पत्रमांगल्यं तत्पुण्याहं भवन्तस्तु मे ॥ मम गृहे स्वकर्मणः पुण्याहं भवन्तो ब्रुवन्तु त्रिः ॥ स्वस्ति
पुण्याहमिति त्रिर्विप्राः ॥ ततः स्वस्तिर्याच्या विनाशाख्या पुण्यकल्याणवृद्धिदा ॥ विनायकप्रिया
नित्यं तां स्वस्तिं नो ब्रुवन्तु नः ॥ मम गृहे स्वस्तिं भवन्तो ब्रुवन्तु ॥ आयुष्मते स्वस्तिरिति विप्राः ॥ सागरस्य
तु या ऋद्धिर्महालक्ष्म्यादिभिः कृता ॥ संपूर्णा सुप्रभावा च तां च ऋद्धिं नो ब्रुवन्तु नः ॥ मम गृहे ऋद्धिं भवन्तो
ब्रुवन्तु ॥ ऋध्यतामिति ते त्रिः ॥ पृथिव्यामुद्धृतायां तु यत्कल्याणं पुरा कृतं ॥ ऋषिभिः सिद्धगन्धर्वैस्त
त्कल्याणं ब्रुवन्तु नः ॥ मम गृहे कल्याणं भवन्तो ब्रुवन्तु ॥ कल्याणमिति त्रिर्विप्राः ॥ ततः क्षीरोदधिमथनेम
थ्यमाने महोदधौ ॥ विश्वेशश्चैव प्रियया नित्यं तां श्रियं नो ब्रुवन्तु नः ॥ मम गृहे श्रीरस्त्विति भवन्तो ब्रु
वन्तु ॥ अस्तु श्रीरिति ते त्रिः ॥ वर्षशतं परिपूर्णमस्तु ॥ शिवमस्तु ॥ वंशाभिवृद्धिरस्तु ॥ प्रजापतिः प्रीयं
तां ॥ ततो विप्राः सुरास्त्वामभिषिंचन्तु ब्रह्मविष्णुमहेश्वराः ॥ वासुदेवो जगन्नाथस्तथा संकर्ष
णो विभुः ॥ प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ॥ आखंडलोऽग्निर्भगवान्यमो वै निर्ऋतिस्तथा
रु

79/1957

वरुणः पवनश्चैव धनाध्यक्षस्तथा सुरः ॥ ब्रह्मणा सहिताः सर्वे दिक्पालाः पांतु ते सदा ॥ कीर्ति
र्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ॥ बुद्धिर्लज्जा वपुः शांतिः कांतिस्तुष्टिश्च मातरः ॥ एतास्त्वाम
भिषिंचन्तु देवपत्न्यः समागताः ॥ आदित्यश्चंद्रमा भौमो बुधजीवसितार्कजाः ॥ ग्रहास्त्वामभिषिंचन्तु रा
हुः केतुश्च तर्पिताः ॥ देवदानवगंधर्वा यक्षराक्षसपन्नगाः ॥ ऋषयो मनवो गावो देवमातर एव च ॥ दे
वपत्न्यो ध्रुवा नागा दैत्याश्चाप्सरसां गणाः ॥ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ॥ एते त्वा
मभिषिंचन्तु सर्वकामार्थसिद्धये ॥ इत्याद्यैः पुराणोक्तैरभिषिंचेयुः ॥ तत्र पत्नी वामे ॥ ततः करोतु स्वस्तिब्रह्मस्ते
साद्यैः पूर्वोक्तैर्यजमानस्य पत्नी राजन्य तिलकं ॥ आशीर्वादश्च एवं सर्वत्र ॥ इति कमलाकरभट्टकृतो
शूद्रस्य पुण्याहवाचनं ॥ ततः कर्ता तंदुलपुंजेषु गौरी पद्मा शची मेधा सावित्री विजया जया ॥ देवसेना
स्वधा स्वाहा मातरो लोकमातरः ॥ धृतिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता ॥ गणेशेनाधिका ह्ये
ता वृद्धौ पूज्यास्तु षोडश ॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥ वाराही च तथेन्द्राणी चामुं

श्रा.प्र.
२९

ड्गप्रमातर इति गणेशपूर्वकं गौर्यादिषोडशमातॄरभ्यर्च्यादि सप्तघृतमातॄर्निर्मान्दृशवाह्यकुड्येघ
तेन च सप्त वा धाराः कृत्वा वसुधारायै नमः इत्यावाह्य षोडशोपचारैः संपूज्य नांदीश्राद्धं कुर्या
त् । यथा सर्वं सव्येन देवतीर्थेन यवैश्च पित्र्येपि । मात्रादित्रय पित्रादित्रय मातामहादित्रय संबंधि
नांदीमुख सत्यवसुसंज्ञक विश्वेदेवस्थाने भक्ष्याः क्षणः कर्तव्यः प्राङ्मुखान्वेत्तोमातृमवावेति
द्वौ विप्रौ कुशाश्चटौ वा दैवे निधाय मातृपितामहीप्रपितामहीनाममुकदेवीनां दासीनामिसा
ना पीचूडामणि । नांदीमुखीनां स्थाने इत्यादिनाहो । पितृपितामहप्रपितामहानां नांदीमुखानां
स्थाने इत्यादिनाहो । मातामहप्रमातामहवृद्धप्रमातामहानां सपत्नीकानां नांदीमुखानां स्था
ने इत्यादिनाहो । केचित्समतानुसारिणां तु मातृमातामहप्रमातामहा इति मातामहेन सह मा
तुः श्राद्धं नांदापार्वणे द्वयमेव । मातृनामगोत्रेमन्ते निर्णयसिंधौ ज्ञेयं । ततः सत्यवसुसंज्ञका २९
विश्वेदेवाः इदं वः पाद्यं । एष वोर्घः । एवं मात्रादयः पित्रादयः मातामहादयश्च इदं वः पाद्यं । ततः

81/1951

विश्वेदेवाः इदमासनं वो नमः । एवं मात्रादौ । अर्घस्थाने संकल्पसिद्धिरस्तु । विश्वेदेवाः एष वो गं
धः । एवं मात्रादौ । एवं इमानि पुष्पाणि धूपः दीपः आच्छादनं एते अमुकेभ्यः गंधपुष्पधूपदी
पाच्छादनानि ताः । सर्वे उपचाराः संपूर्णाः भवन्तु । ततोर्धचंद्रमंडलमभ्युक्षणं वा कृत्वा पात्रेषु धा
मान्नं सोपस्करं आममन्नं तत्तथा शक्तिहेमवा प्रदद्य स्वाहा न मम । एवं मातृपितामही प्रपिता
मह्यः नांदीमुख्यः इदं वः पूज्येत्यादि । पितृपितामहप्रपितामहाः नांदीमुखाः इदं वः पूज्येत्यादि
। एवं मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नांदीमुखाः इदं वः इत्यादि एवं मा
तामहप्रमातामहवृद्धप्रमातामहाः सपत्नीका नांदीमुखा इत्यादि । अत्र पिंडाः कृता कृताः पिं
डपक्षे वेदीं कृत्वा पूर्वाग्राः लेखाः तिस्रः कृत्वा दर्भानास्तीर्य मातर्नांदीमुखि अवनेनिक्ष्वेति तत्संस्था
एवं पितामहि प्रपितामहि । एवं पितः नांदीमुखेत्यादि ततः सक्षुना गुडेन वा दधिबदरयवमि
श्रान्नपिंडान् । एतत्ते मातर्नांदीमुखि एष ते पिंडः इदमन्नं स्वाहा न मम । इत्येकैकं पिंडं दत्वा परं तस्मी

श्रा.प्र.
३०

द्वितीयं॥ एवमेकैकस्य दैवे होरेत्वा पुनः॥ प्रसवने निक्षिपेत् इति प्रसवने जनं प्रागुक्त्वा संजने जने कांस्यांसि
च दत्वा शेषमाघ्राय पात्रेषु जलं परि आशिषो वाच्या आपः संतिष्ठादि॥ कृतैतत् श्राद्धकर्मणः सां
गतासिद्ध्यर्थं द्राक्षामलकयवाः तन्निष्क्रयं वा दक्षिणां तु संप्रदद्ये स्वधा नमः इति प्रत्येकं दत्वा
ते न तां दीर्घा श्राद्धे न नांदीमुखाः देवताः प्रीयंतां॥ माता पितामही चैव तथैव प्रपितामही॥ पिता पितामह
हश्चैव तथैव प्रपितामहः॥ मातामहस्तत्पिता च प्रमातामहकादयः॥ एवं भवंतु मे प्रीताः प्रयच्छंतु
मंगलमिति संप्रार्थ्य पिंडान्विसर्जेत्॥ इति वृद्धिश्राद्धं॥ एतत्सर्वं तत्सर्वत्र संस्कारेषु च समानं पत्र तुल्य
दृष्टं तु लोकेषु विस्तरेण तत्राचाराच्छेदं वेद्यं॥ आपः क्षीरकुशाग्राणि दधि दूर्वाक्षतास्तथा सर्ष
पाः कुंकुमं चेति अर्घोऽष्टांगः स्मृतः॥ कीर्तितः स्पृष्टं गमर्घं दत्वा पितिर्थ्या॥ स्वागतं भो द्विजश्रेष्ठा मदनुग्र
हकारकारकः॥ इदमर्घमिदं पाद्यं प्रयत्नैः प्रतिगृह्यतामिति पादार्घमाचारात् दत्वा ...
गंधं कृत्वा ब्राह्मणान्प्रार्थयेत्॥ ब्राह्मणाः संतु मे प्रीताः पापात्संतु समाहिताः॥ वेदानां वेददाता

83/1951

रः पारगाः सर्वदेहिनां॥ जपयज्ञैस्तथा होमैर्दानैश्च विविधैः पुनः॥ देवानां च पितॄणां च तर्पणार्थं यात
काः कृताः॥ येषां देहे स्थिता वेदाः पावयंति जगत्त्रयं॥ रक्षंतु सततं ते मां जपयज्ञेष्ववस्थिताः॥ ब्रा
ह्मणा जंगमं तीर्थं त्रिषु लोकेषु विश्रुतं॥ येषां वाक्योदकेनैव शुध्यति मलिना जनाः॥ पावनाः सर्व
वर्णानां ब्राह्मणा ब्रह्मरूपिणः॥ सर्वकर्मरता नित्यं वेदशास्त्रार्थकोविदाः॥ श्रोत्रियाः सत्यवाचश्च
देवध्यानरताः सदा॥ यद्वाक्यामृतसंसिक्ता ऋद्धिं यांति नरद्रुमाः॥ अंगीकुर्वंतु कर्मैतत्कल्पद्रुम
समाशिषः॥ यथोक्तनियमैर्युक्ता मंत्रार्थे स्थिरबुद्धयः॥ यत्कृपालोचनात्सर्वा ऋद्धयो वृद्धिमा
प्नुयुः॥ मम यज्ञे जये पूज्याः संतु मे नियमान्विताः॥ अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः॥ दे
वध्यानरता नित्यं प्रसन्नमनसः सदा॥ अदुष्टभाषिणः संतु मा संतु परनिंदकाः॥ मम पि नियमाः श्रो
ते नवं तु भवतामपि॥ अन्वस्तां प्रासंगिकं॥ अथ गर्भाधानं॥ तत्राद्यर्तौ दर्शनि दुष्टकाल सर्वति ...
दोषशांतिं मन्कृत्वा शांतिरत्नोक्तविधिना कृत्वा प्रथमरात्रिचतुष्टयवर्जं समरात्रिषु मन्कृतनिर्णयसिंधु

स्व०५०
३१

वृद्धिकाले तत्कार्यार्थं कर्त्तास्मिन्नायोरित्याकालो स्मृत्वा ऽस्यां मम भार्यायां जनिष्यमाणसर्वगर्भाणां बी
जगर्भसमुद्भवैनोनिवर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं गर्भाधानं करिष्ये इत्युक्त्वा तदंगतया गणेश
पूजा पुण्याहवाचनं मातृपूजा नांदीश्राद्धानि च कृत्वा जंहतो नववस्त्रं धृत्वा स्वगंधारं संदूर्वार
संना यदि क्षिणनासाविजे सेचयेत् नृरिराजितः सूर्यं नमस्कुर्यात् ततो रात्रौ शय्यायां विष्णवे नमः
एवं त्वष्ट्रे प्रजापतये धात्रे सितवासे सरस्वत्यै अश्विभ्यां पर्जन्याय नमः इति योनिमभिमृ
श्य पत्नीयं गत्वा ऋतौ स्नायात् स्त्रिया न स्नानं अनंतो मुखं चैव नेत्रावमने इति गर्भाधानं अथ
पुंसवनं। द्वितीये तृतीये चैव चतुर्थे वा मासे पुंनक्षत्रे भर्त्रा संगं कृत्वा देशकालौ स्मृत्वा ऽस्यां मम
भार्यायां जनिष्यमाणगर्भस्य पुंरूपता मास्मर्थं बीजगर्भसमुद्भवैनोनिबर्हणार्थं च परमेश्व
रप्रीत्यर्थं पुंसवनं करिष्ये इति संकल्प्य गणेशपूजा पुण्याहवाचनं मातृपूजा नांदीश्राद्धानि ३१
कृत्वा समानवर्णवत्सगोर्दधि पत्न्या दक्षिणपाणौ दत्वा मध्ये यवं द्वौ माषौ पार्श्वयोर्दत्वा किंपि

85/1951

बसि इति त्रिः पृष्ट्वा पुंसवने पुंसवनमिति त्रिरुक्त्वा सा प्राश्नीयात् एवं त्रिः कुर्यात् इति पुंसवनं॥
अथ सीमंतः चतुर्थे षष्ठे ऽष्टमे वा मासि प्राग्वा प्रसवात् पुंनक्षत्रे भर्त्ता देशकालौ संकीर्त्य मम भा
र्यायां जनिष्यमाणसर्वगर्भाणां बीजगर्भसमुद्भवैनोनिरसनद्वारा प्रतिगर्भं संस्कारातिशया
र्थं परमेश्वरप्रीत्यर्थं सीमंतोन्नयनं करिष्ये इत्युक्त्वा तदंगतया गणेशपूजा पुण्याहवाचनं मातृपू
जा नांदीश्राद्धानि कृत्वा जंहतो नववस्त्रं धरो दूर्वारसंनायादि क्षिणनासायां अग्नये नमः राज्ञे नमः व
रुणाय नमः इति सिंचेत् ततस्त्रिः शुक्लत्वाशलाजीकु [illegible] त्रय पयुतां उदुंबरफलगुच्छयुतां [illegible] दाय पत्न्या
स्तितां प्रजापतये नमः इति मूर्ध्नादारभ्य भ्रूमध्यं [illegible] द्विधा केशान्कृत्वा त्रिः सीमंतं कुर्यात् ततो वीणा राजसूत्तद
संगे फलं [illegible] दुकाहि दत्वा विप्रे सोम [illegible] ना इति क्षिणं च दद्यात् [illegible] नारदः विप्रक्षत्रियपयोः कुर्यात्
द्विधा सीमंतकर्मसु वैश्यशूद्रकयोस्त्वे तद्विवाभि [illegible] चन अत्र विशेषो गर्भनिर्णये तस्थ्येति धर्मा
श्रमकृते निर्णयसिंधौ ज्ञेयः इति सीमंतः अथ जातकर्म पुत्रं चंद्रोदये कालाजितिः मार्दुर्भविष्यु

श्र.५०
३२

त्पुत्रीश्च्चंद्रसूर्यग्रहे तथा ॥ स्नात्वानंतरमात्मीयान् पितॄनभ्यर्च्य तर्पयेत् ॥ कुमारे जाते नाभिच्छेदात्
प्राक् पिता सचैलं स्नानं कृत्वा देशकालौ संकीर्त्य कुमारस्य गर्भांबुपानजनितदोषपरिहारार्थं
जीवगर्भसमुद्भवैनोनिबर्हणद्वारा बलायुर्वर्चोऽभिवृद्ध्यर्थं श्रीपरमेश्वरप्रीत्यर्थं जातकर्म क-
रिष्य इति संकल्प्य गणेशपूजां पुण्याहवाचनं मातृपूजां हेम्नां दीक्षां सूचकल्कमाज्यमधुनी हे ॥
म्ना घर्षयित्वा हेम्ना प्राशयेत् ॥ पिता कर्णयोर्निधायदेवायमस्मिन्नमः सरस्वत्यै नमः अश्विभ्यां
नमः इत्युक्त्वा सावित्रिं स्पृशेत् ... नमः इत्युक्त्वा विप्रान् पूजयेत् ॥ इति जातकर्मप्रयोगः ॥ अथ षष्ठीपू-
जा ॥ निर्णयसिंधौ मार्कंडेयः ॥ रक्षणीया तथा षष्ठी निशा तत्र विशेषतः ॥ रात्रौ जागरणं कार्यं
जन्मदानां तथा बलिः ॥ पुरुषाः शस्त्रहस्ताश्च नृत्यगीतैश्च योषितः ॥ रात्रौ जागरणं कुर्यु-
र्दशम्यां चैव सूतके ॥ बलिः ॥ व्यासः ॥ सूतिकावासनिलया जन्मदा नाम देवताः ॥ तासां यागनिमि- ३२
त्तं तु शुद्धिर्जन्मनि कीर्तिता ॥ प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा ॥ त्रिष्वेतेषु न कुर्वीत सूतकं पुत्र-

रा

87/1957

जन्मनि ॥ अपरार्के ब्राह्मे कृत्यान्तरम्लोरा नरकाद्या वा तथा चैव पंचमी ॥ क्रीडनार्थं च बालानां षष्ठी
चैव शिशुरक्षणी ॥ स्कंदे तु पूजनीया वै वेश्या ब्राह्मणैर्द्विजातिभिः ॥ राकानुमतिः सिनीवाली कुहूरिति च
तस्मात् ॥ कन्यारूपं ॥ पिता देशकालौ स्मृत्वा ममास्य शिशोः सर्वारिष्टशांत्यायुरारोग्यसिद्ध्य-
र्थं गणेशजन्मदाजीवंतिकाराकादीनां पूजनं करिष्य इति संकल्प्य कलशं संस्थाप्य
तत्र पूर्णपात्रे वस्त्रे परिगणेशं जन्मदा जीवंतिकां स्कंद राका ममनुमति सिनीवाली कुहू
वा तथा च प्रतिमास्वावाह्य खड्गे शिशुरक्षणीं कुड्ये लिखितां षष्ठीं चावाह्य षोडशोपचारैः सं
पूज्य माषतोलका दिबलिं दत्वा प्रार्थयेत् ॥ गौरीपुत्रो यथा स्कंदः शिशुत्वे रक्षितः पुरा ॥ तथा ममाप्य-
यं बालः षष्ठिके रक्ष्यतां नमः इति ॥ इति षष्ठीपूजा ॥ अथ दत्तकपुत्रविधिः ॥ आत्मपारिहोमस्य पुत्र-
प्रतिग्रहतान्नत्र चरुश्रपणयोरनधिकारात् त्रयोदशकः पुत्रो न भवत्येवेति रुद्रधरादयः ॥ वि-
प्रद्वारा होमादिकारयेदिति वर्धमानहरिनाथादयो गौडाः ॥ संबंधतत्त्वे प्रयोगपारिजाते

स्मृ.कौ०
३३

शौनकः। अपुत्रो मृतपुत्रो वा पुत्रार्थं समुपोष्य च। वाससी कुंडले दत्वा उष्णीषं चांगुलीयकं। बंधनत्वे
न संभोज्य ब्राह्मणांश्च विशेषतः। अन्वाधानादि तंत्रं कृत्वा आज्योत्पवनांतकं। दातुः समक्षं गत्वा तु पु
त्रं देहीति याचयेत्। देवस्य त्वेति मंत्रेण हस्ताभ्यां परिगृह्य च। अंगादंगेत्यृचं जप्त्वा आघ्राय शिशु
मूर्धनि। गृहमध्ये तमाधाय चरुं हुत्वा विधानतः। यस्त्वा हृदेत्यृचा चैव तुभ्यमग्न इत्येकया। सोमो
ददद्रित्येताभिः प्रत्यृचं च समिल्लया। स्विष्टकृदादि होमं च कृत्वा शेषं समापयेत्। मिताक्षरादौ
वसिष्ठेन तु आहुतिभिरग्नेन होमवत्कः स च विप्रद्वारा कारणीयः। विशेषस्तु मत्कृते निर्णय
सिंधौ ज्ञेयः। स च दत्तकः पंचवर्षमध्ये ग्राह्यो नोर्ध्वं। ऊर्ध्वं तु पंचमाद्वर्षान्न दत्ताद्याः सुता नृपेति
कालिकापुराणे। ऊर्ध्वं तु स्वदाने त्वौरेव दानं विक्रयं चैव हीनं च तनये याः स्मृतास्तुवः। दाराः पुत्रा
श्च सर्वस्वमात्मनेव तु योजयेदिति हेमाद्रौ व्यासोक्तेः। अनुपात्वत्ष्का॥ स्वकुटुंबाविरोधिन देय
दारसुतादृते इति। तत्त्वदानानि तु पुत्रपरमिसन्यत्र विस्तरः। इति दत्तकपुत्रविधिः। अथ सूतिकास्ना ३३

२

89/1915

नं। ज्योतिषे। करेंदुभाग्यानिलवासवांत्यमैत्रेंदवाश्विध्रुवनेकिपुमं। तिथौ च रिक्ते शुभमामनं
ति प्रसूतिकास्नानविधिं मुनींद्राः। अथ नामकर्म। मदनरत्ने बृहस्पतिः। द्वादशे दशमे वापि जन्मतो
पि त्रयोदशे। षोडशे विंशतो चैव द्वात्रिंशे वर्षतः क्रमात्। नारदीपेस्तकांते नामकर्म विधेयं स्वकु
लोचितं। नाम पूर्वं तु बालस्य मंगलं सुसमाक्षरैः। तत्रैव गार्ग्यः। मासनाम गुरोर्नाम दद्यात्कु
लस्य वै पिता। कृष्णोऽनंतोऽच्युतश्चक्री वैकुंठोऽथ जनार्दनः। उपेंद्रो यज्ञपुरुषो वासुदेवस्तथा ह
रिः। योगीशः पुंडरीकाक्षो मासनामान्यनुक्रमात्। अत्र मार्गशीर्षादिः क्रमः। केशवादिर्वा इति म
दनरत्ने। नाक्षत्रमपि नाम कार्यं। कुलदेवतानाम नक्षत्रसंबंधि पिता नाम कुर्यादिति तत्रैव शंखोक्तेः
परिशिष्टेऽपि। नरक्षरादिकं नाम यस्मिन् धिष्ण्ये यदक्षरं। मनुः। कृष्णस्य मेष्यसंयुतं। तत्र स्यादे
वां तिद्वादशो वापि पिता देवस्य कालोऽस्मत्तास्य कुमारस्य बीजगर्भसमुद्भवेनो निवर्हणार्थं नाम व्य
वहारसिद्ध्यर्थं च नामकरणं करिष्ये इति संकल्प्य गणेशपूजापुण्याहवाचनमातृपूजानांदीश्रा

श्र.प्र.०
३४

इमानिकृत्वाकांस्यादिपात्रेतंडुलपूर्णेहिरण्यागणेशनामततः कुलदेवतानामततोमासनामत
तोनाक्षत्रंततोव्यवहारिकंनिश्चिवदासइत्यादिनिखित्वानामदेवताः संपूज्यशिशोर्दक्षिणकर्णेमु
कनकोमित्रमुकोमीत्यादिनामानिलक्ष्योधृतांजलिः कुलदेवतानामाममुकदासोमकृतःस
र्वानिब्राह्मणनभिवादयेति।आमुष्मात्रवलममुकदासइतिविप्रा।।एवंमासनाम्नानाक्षत्रेणना
म्नाम्याव्यवहारिकेणनाम्नमासादिवाचं।।नतः शतदृशावामान्नानिस्त्वाविप्रेभ्यआशिषोगृह्णीया
त।।इतिनामकर्म।।अथदोलारोहः।।पारिजाततेवृहस्पतिः।।रवट्वारोहणंकर्तव्योदशमेद्वादशेपि
वा।।ज्योतिर्निबंधे।।आदोलाशायनेपुंसोद्वादशेदिवसेः शुभः।।त्रयोदशेतुकन्यायाननक्षत्रवि
चारणा करस्वमेवैष्णवेरेवतीपुष्टितिद्यपिचाश्विनके ध्रुवेषु।।कुर्याच्छिशूनांनृपतेश्चतद्दरादो
लंवेददिनोत्सवंति।।अथकर्णवेधः ज्योतिर्निबंधेगर्गः।।मासेषष्ठेसप्तमेवाष्टमेद्वावेध्योकर्णो
द्वादशेषोडशेपि।।हेमाद्रौव्यासः कार्त्तिकेपौषमासेवाचैत्रेवाफाल्गुनेपिवा।।कर्णवेधंप्रशंसंति

91
1951

शुक्लपक्षेशुभेदिने।।मृचमृगाभाहस्तचित्रापुनर्वसुपुष्यश्रवणधनिष्ठारेवतीषुरिक्तापर्वर्जेतिः
थोकार्यः।।मदनरत्ने।।सौवर्णराजपुत्रस्यराजतीविप्रवैश्ययोः।।शूद्रस्यचायसीसूचीमध्यमाष्टं
गुलात्मिका।।चंडेश्वरः।।सार्द्धमासद्वयेदद्यात्तांबूलंप्रथमंशिशोः।।अथनिष्क्रमणं।।ज्योतिर्निवं
धेयमः।।तृतीयेवाचतुर्थेवामासिनिष्क्रमणंभवेत्।।मनुः मासेचतुर्थेकर्तव्यंशिशोर्निष्क्रमणंगृ
हात्।।षष्ठेन्नप्राशनंमासियद्वेष्टंमंगलंकुले।।अत्रिश्मृतिर्नतुद्विजोक्तिः।।तेनमृदस्यापीतिमे
धातिथिः।।मदनरत्नेवृहस्पतिः।।अन्नप्राशनकालेवाकुर्यान्निष्क्रमणक्रिया।।विष्णुधर्मोत्तरे
दिगीशानांदिशांनत्रतथाचंद्रार्कयोर्द्विज।।पूजनंवासुदेवस्यगगनस्यचकारयेत्। बहिर्निष्क्रा
त्रायदेहाम्बंरवपुण्याहनिः स्वनैः पिताददद्याकालोस्मत्वास्यशिशोबीजगर्नममुकं वेनोनिबर्ह
णं।।धारावलायुर्वर्चोभिवृद्ध्यर्थंनिष्क्रमणंकरिष्येइतिसंकल्प्यगणेशपूजापुण्याहवाचनमातृपूजा
नांदीश्राद्धानिकृत्वाप्रतिमास्वः क्षतैः पूर्वंभादिदशादिकपालेचंद्रसूर्यवासुदेवगगनानांनाममंत्रावाह

सं०
३५

नादित्यं जोत्स्नां शंखवत्पूर्णमंगलसंवेष्टितं चंद्रधेनूनां दर्शनं कारयित्वा पठेत्॥ ब्रह्मार्कैर्यो दिगीशा
नां दिशां च गगनस्य च॥ निक्षेपार्थमिमं दद्मि ते मे रक्षंतु सर्वदा॥ अप्रमत्तं प्रमत्तं वा दिवारात्रमथा
पि वा॥ रक्षंतु सततं सर्वे देवाः शक्रपुरोगमाः॥ ततो विप्रान् करोतु स्वस्तिवचनं ब्रह्मलोकाद्याशीः षंढधुः
॥ अथोपवेशनं॥ नयोगपारिजाते॥ पंचमे च तथा मासि निर्मोलमुपवेशयेत्॥ तत्र सौवीर
हाः शस्ता भौमोऽप्यत्र विशेषतः॥ विष्णुधर्मोत्तरे॥ वराहं पूजयेद्देवं पृथ्वीं चैव तथा द्विज॥ पिता देशकालौ
संकीर्त्य कुमारस्य सर्वारिष्टशांत्यायुरारोग्यक्षेमार्थमुपवेशनं करिष्य इति संकल्प्य गणेशपूजापु
ण्याहवाचनं च कृत्वा पीठे प्रतिमायां पूजयेत्॥ वराहं पृथ्वीं च नाम्ना षोडशोपचारैः संपूज्य तदग्रे
च समभायामैः पूजां कृत्वा तन्मध्ये नमो वन्हे करोतु स्वस्तिते ब्रह्मलोको वाद्यघोषेण शिशुमुपवेशयेत्
मंत्रः रक्षेतां त्वा नमस्कार रक्षां कृत्वा पठेत् रक्षैनं वसुधे देवि सदा सर्वगतं शुभे॥ आयुः प्रमाणं सकलं निक्षिप
स्व हरिप्रिये॥ अचिरादायुषस्त्वस्य ये केचित्परिपंथिनः॥ जीवितारोग्यवित्तेषु निर्दह स्वाचिरेण ता

93
1951

न्॥ वरेण्याशेषभूतानां माता त्वमसि काधुमे॥ अजरा चाप्रमेया च सर्वभूतनमस्कृता॥ चराचरा
णां भूतानां प्रतिष्ठानाय्मयाह्यसि॥ कुमारं पाहि मातस्त्वं ब्रह्मा तदनुमन्यतामिति॥ अत्रैव कादिसंबं
धे नंत्रिपाल्लन्नप्राशनदिने एव निष्क्रमणमुपवेशनं च कुर्वंति॥ अथान्नप्राशनं॥ मदनरत्ने नारदः षष्
ष्ठे वाप्यष्टमे मासि पुंसां स्त्रीणां तु पंचमे मासि वाका यनेकात्र माशानं शुभं॥ लौगाक्षिः षष्ठेन्नप्रा
शनं जातेषु दंतेषु वा॥ विष्णुधर्मोत्तरे॥ ब्राह्मणं शंकरं विष्णुं चंद्रार्कौ च दिगीश्वरान्॥ तु वदिग्रासुमपूज्य
कृत्वा वह्नौ तथा चंद्रं देवतापुरतस्तस्य धात्र्युत्संगगतस्य च॥ अलंकृतस्य दातव्यमन्नं पात्रे सकांचनं
॥ मध्वाज्यदधिसंयुक्तं प्राशयेत्पायसं तु वा॥ सर्वत्र मंगलं विशेषश्च मस्कृते निर्णयसिंधौ ज्ञेयः॥ पि
ता देशकालौ संकीर्त्य शिशोर्बीजगर्भसमुद्भवैनोनिबर्हणायुर्वर्चोभिवृद्ध्यर्थमन्नप्राशनं
करिष्य इति संकल्प्य गणेशपूजापुण्याहवाचनमातृपूजानांदीश्राद्धानि कृत्वा नांदीश्राद्धं प्रतिमा
सुतेऽलंकृतं पुंजे शुभासने उपविश्य मातिवेक्षे चरुं कृत्वा आज्यदधिमधुघृत मंत्रेया यमे वा प्राशयित्वा भूजं

श्र.द्र.०
३६

चरत्वारम्नहे मम त्री माजनाद्यो ये निधा यवास्तः स्पृशेन्मात्मजीविके तिपरी क्षयेत् ॥ इ सन्नप्राशनं ॥
अथायुष्य पूजा ॥ गौड व्यवहारनिर्णये ॥ नवांवरधरो भूत्वा पूजयेच्च चिरायुषं ॥ मार्कंडेयं नरो भक्त्या पू
जयेत्प्रयतस्तथा ॥ ततो दीर्घायुषं व्यासं रामं द्रौणिं कृपं बलिं ॥ प्रह्लादं च हनूमंतं विभीषणमथा
र्चयेत् ॥ स्वनक्षत्रं जन्मतिथिं प्राप्य संपूजयेन्नरः ॥ षष्ठीं च दधिभक्तेन वर्षे वर्षे पुनः पुनः ॥ तिथि
नक्षत्रे तन्नाम्ना तिलहोमोप्युक्तः ॥ आदिपुराणे ॥ सर्वेषां जन्महि वसे स्नातैर्मंगलवारिभिः ॥ गुरु
देवाग्निविप्राश्च पूजनीयाः प्रयत्नतः ॥ स्वनक्षत्रं च पितरस्तथा देवः प्रजापतिः ॥ प्रतिसंवत्सरे कु
र्यात् [illegible] महोत्सवः ॥ कृत्यचिंतामणौ गुडदध्यतिलान्नं दद्यात् [illegible] चवं धयेत् ॥
गुग्गुलुनिंबसिद्धार्थदूर्वागोरोचनादिकं ॥ संपूज्य मानुविघ्नेशो महर्षिं प्रार्थयेद्धि ह जन्मतिथि
[illegible] कोमाह्या नंदुके कृत्यतत्त्वार्णवे स्कान्दे युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया रवेरुद्र
[illegible] संतेन तत्र तिथियुग्मते ति ॥ पिता सबालो संगच्छत्वा नवचन्द्रधरो देश [illegible]

दीर्घायुरारोग्यपार्थं वर्षवृद्धिदिदिनकृत्यं करिष्य इत्युक्त्वा प्रतिमासस्वक्षत्रसुजेषु वा गणेशं सूर्यं मार्कं
डेयं व्यासं परशुरामं अश्वत्थामानं कृपं बलिं प्रह्लादं हनूमंतं विभीषणं षष्ठीं स्वनक्षत्रं पितरौ प्र
जापतिं गुरूनग्निं च संपूज्य पृष्ठे तन्नाम्नाति लहोमं च कृत्वा गुग्गुलुनिंबसर्षपदूर्वारोचनागुडा
न्नापाटलज्ञी हस्ते बध्वा मार्कंडेयं प्रार्थयेत् चिरजीवी यथा त्वं भो भविष्यामि तथा मुने रूपवा
न्वित्तवांश्चैव श्रिया युक्तश्च सर्वदा ॥ मार्कंडेय नमस्तेस्तु सप्तकल्पान्तजीविने ॥ आयुरारोग्य
सिद्ध्यर्थं प्रसीद भगवन्मुने ॥ चिरंजीवी यथा त्वं तु मुनीनां प्रवरो द्विज ॥ कुरुष्व मुनिशार्दूल तथा मां
चिरजीविनं ॥ मार्कंडेय महाभाग सप्तकल्पान्तजीवन ॥ आयुरारोग्यसिद्ध्यर्थमस्माकं वरदो भव ॥ पिता
लेनमिति वरेत ॥ ततो गुडतिलयुतं दुग्धमात्राय सतिलगुडसंमिश्रं जलमुद्धमितं यपः ॥ मार्कंडेया
द्दे [illegible] पिबाम्यायुर्विवृद्धये इति पीत्वा ततो गुरून्देवान्विप्रान् पूज्याः ॥ गौडनिर्णये तत्त्वे स्कान्दे ॥ खंडनं नखर
केशानां मैथुनाध्वगमौ तथा ॥ आमिषं कलहं हिंसां वर्षवृद्धौ विवर्जयेत् ॥ नवे वकृतानंतकुजयो

95/1953

श्र.क०
३७

वरियस्य जन्मतिथिर्भवेत् ॥ जन्मनक्षत्रयोगसंप्राप्तो विप्रलस्य पदे पदे ॥ कृतांतः शनिः जन्मनक्षत्रयोगे
न दोषः तस्य सर्वौषधिस्नानं गुरुदेवाग्निपूजनं ॥ विशेषां निर्णयसिंधौ संक्षेपः ॥ अथ यद्वेमाद्रौ व
र्धापने विशेषः ॥ भविष्ये युधिष्ठिर उवाच ॥ हे देव देव महाभाग बालानां हितकाम्यया वर्धापनवि
धिं ब्रूहि राज्ञामपि विशेषतः ॥ श्रीकृष्ण उ० ॥ प्रयागे व्यासेन दृष्टः सनत्कुमारः प्राह मासि प्रविष्टे प्रथ
मे बालवर्धापने बुधैः ॥ राज्ञां वा तन्मुनिश्रेष्ठ समं तेन विधीयते ॥ कुमुदा माधवी गौरी रुद्राणी पा
र्वती उमा ॥ काली सरस्वती चैव सावित्री ब्रह्मणः प्रिया ॥ सती संध्या तपा मेधा पुष्टि तुष्टि समन्विता
॥ न परिलयरित्राणा जीवंतीनाम षोडश ॥ पूजनीयाः प्रयत्नेन स्वर्णमयेवि लिख्य तु रजनीपिष्टे
नो वापि लिखेद्वा कुंकुमेन तु ॥ गंधपुष्पैः सुगंधैश्च दीपवस्त्रनिवेदनैः ॥ पूजनीयास्तु संस्थाप्य कुमु
दाद्याः स्वरूपकृष्टयकृ नामभिः स्तपनीयास्ताः पूजयित्वा तु बालकं ॥ नृपतिं तु मुने वा यस्य बीजं कार ३
येत् ॥ पूजयेन्मातृपितरौ बालवर्धापने सति ॥ पुरोधाः पूजयेद्भक्त्या राजवर्धापनविधौ कुमुदाद्याः

97/1951

समुद्रिस्य पवेशापात्राणि कल्पयेत् ॥ एकैकस्या धनाढ्यस्तु दद्यात्षोडश षोडश ॥ तदर्धानि तदर्धा
नि चैकैकमथापि वा ॥ बहुपक्वान्नयुक्तानि बहुपुष्पफलानि तु ॥ सुवासिनीभ्यो विप्राणां दद्यादग्
निपुरः सरं ॥ प्रीयतां कुमुदाद्या मे बालकायुर्विवर्द्धनाः ॥ बलेन यशसा तुष्ट्या बालं मे वर्धयंतु वै ॥
अपक्वं तु सदा रोगं पक्वं सौख्यं सौभाग्यमेव च ॥ श्रीश्च ते इति च मंत्रेण ह्यर्घ्यं तस्यैः प्रदापयेत् ॥ वस्त्रं तांबू
लपुष्पादि दिने तस्मिन्प्रकल्पयेत् ॥ सुवासिनीनां देयं तु कुमुदा प्रीयतामिति ॥ तत्रैव संस्कारे ॥ एवं वर्धा
पनं वत्सरांते वै जन्मवासरे ॥ कृते तेषु च मासेषु बालानां बलवृद्धये ॥ न बालरोगाः प्रभवंति बालन
स्कंदरोगा न तु शाकिनीभ्यः ॥ नयेन्नवेत्रे व जलाग्नि हिंस्रौ बालश्च पुष्टः सविशेषतश्च ॥ संप्राप्य रा
ज्यं नृपतिः समांते कुर्यात् हि मंत्रांति महोत्सवं च ॥ तथास्तया पूज्य विनायकं च दुर्गां च चित्रकृत्या कुमुदा
दिदेवीः ॥ पः पूजयेत्सक्ति पुरःसरं हि सहेमपूर्णे विजयैश्चियुक्तः ॥ गोपथब्राह्मणे तु राज्ञा नमस्मि वर्द्
धिष्यन्ना युषा वर्चसा तेजसा यशसा विजयेन ॥ पवित्रे मंगले रम्ये सुक्षेत्रे करैरर्चयित्वा मां हि ॥

श्रू०
३८

ऽहविर्निरूप्य लोकपालेभ्यश्च अर्पयेन्महं इंद्रो यमस्तोऽज मे। त्रिलोकपालांश्चेष्टा राजा नमस्कारम्गुरू
पादर्वंचमिंद्रं त्रातारमिंद्रं चर्दपइति त्रिभिः रक्षां कृत्वा सुगुरुणा मन्त्रास्त्वते इति रोचनेनालंकुर्यात्मजा
ये नं तुमिति मन्त्रं मंपातवेतं कृत्वा धात्राजेयमित्युक्तमभिवर्द्धस्वेति। इति कमलाकरस्तरस्त्रौ। शूद्रधर्म
कमलाकरेऽप्येवं॥ अथ चौलं॥ हस्त स्वाति॥ पापग्रहाणां चारार्दो विप्राणां श्रुनं दरखौ क्षत्रिया
णां भ्रमास्तनौ विट्शूद्राणां ज्ञानौ श्रुतं। अत्र कालनिर्णयः॥ सर्वोमातुर्गर्भे रिजोदर्शने चैनकार्यमि
त्याहिरण्यश्रुविशेषो द्विजतुल्यो मन्त्रे तेनिर्णयसिंधोऽज्ञेयः॥ शूद्रस्य विशेषमात्रं तूच्यते। प्रथमे द्वि
नीये तृतीये पंचमे वाष्टे यथाकुलधर्मं चौलकाले पितादेशकालौ संकीर्त्य शिशोर्बीजगर्भसमुद्भ
र्षनाशद्वारा बलायुर्वर्चोभिवृध्यर्थं चौलकर्म करिष्ये इति संकल्प्य गणेशपूजा पुण्याहवाचन मातृ
का वसोर्धारा नांदीश्राद्धानि कृत्वाग्निस्थापनं अग्निमुखपर्यंते पंकाशिरं केशपंक्तिं वा संरक्ष्य सर्वं वापयेत् ३८
नेयथाचारं कार्यं। ततो नीराजनादि कार्यं। इति चौलं। अथ विद्यारंभः॥ मदनरत्ने नृसिंहः॥ [illegible]

99
1951

स्त्रीकृति कुर्याद्विद्यामि पंचमहायने। उत्तरायणगे सूर्ये कुंभमासं विवर्जयेत्॥ अथ धनुर्विद्यादीपिकायां
॥ अश्विनीतिपुष्यमार्कस्वातिचित्रामृगपित्रधनुर्हरिवसुमूलेष्विंदुभागेषु शनिशशिबुधवारे
विष्णुबोधिविपोषेसु समयतिथियोगे चापविद्याप्रशस्ते। नत्वहरिं लक्ष्मीसरस्वती च पूजयित्वा कार्यं
॥ सर्वायुधमहामात्र सर्वदेवारिसूदन। चापमाममरेरक्ष साकंशरवरैरिह। ध्रुतंकुर्वन्नरक्षार्थं
संहारायहरेण च। त्रयी मूर्तिं गतं देवं धनुरस्त्रं नमाम्यहमिति मंत्रेण संपूज्य नत्वा बाणं प्राच्यामु
त्क्षिप्यानेपजयेत्। अथ छुरिकाबंधनं ज्योतिर्निबंधे। छुरिकाबंधनं वक्ष्ये नृपाणां प्राकरस्महात्
विवाहोक्तेषु मासेषु शुक्लपक्षे प्यनस्तगे। जीवे शुक्रे च सत्पुत्रे चेंदुताराबलान्विते। मौंजीबंधभ्रय
तिथिषु कुजवर्जितवासरे। संग्रहे। शूद्राणां राजपुत्राणां मौंज्यभावे विनाबंधनं। मौंजीबंधनतिथ्या
दौ कार्यं नो मददिने विना। विष्णुधर्मे पूजयित्वा हरिं लक्ष्मीं तथा देवीं सरस्वतीं। स्वविद्यासूत्रकारांश्च
स्वांच विद्यां विशेषतः। एतेषामेव देवानां नाम्ना तु जुहुयाद्धृतं। दक्षिणानि द्विजेन्द्राणां कर्तव्यं वा त्वप

श्रू.सं० जनोमंत्रस्तुसर्वमुधानांमध्यमंनिर्मितास्त्रिपिनाकिना।अजासुधादिनि।कृष्णकृत्वामुष्टिमहंस्थु
३९ मांचंडिकायाःप्रदत्तास्मिसर्वदुष्टनिबर्हिणी।तथाविस्तारितावासिदेवानांप्रतिपादिता।सर्वेस्व
रागस्तास्मिसर्वाखिलनिबर्हिणी।भुरेकेरक्षमांनिस्त्रंत्रांतिंयछवमोस्तुते।इतिसंपूज्यनतांद
क्षिणेकटिभागेवध्नीयात्।अपराकेतुदृश्यातातपः।शिशोरस्युक्षणंभोक्तंबालस्याचमनंस्मृ
तं।रजस्वलादिसंस्पर्शेस्नानमेवकुमारके।प्राक्चूडाकरणात्बालंमागन्त्रश्राद्धानाछिस्तुः
॥कुमारासतुविज्ञेयोयावत्मौंजीनिबध्यते।बालस्यापञ्चमाद्वर्षाद्धार्यशौचमादिशेदि
सौहिमत्कृतेनिर्णयसिंधौज्ञेयं।अथविवाहः।तत्रसापिंड्यशूद्राणांद्विजवरेचसर्वत्रावय
वानुरश्रेमसद्भावादिनिविज्ञानेश्वरः।तद्वमयानिर्णयसिंधावुक्तमितिनात्रोच्यते।तत्रब्राह्मा
र्षदैवप्राजापत्यगांधर्वासुरराक्षसपैशाचाअष्टौविवाहाः।तान्नाहयाज्ञवल्क्यः।ब्राह्मोविवाहआ ३९
हूयदीयतेशक्त्यलंकृता।यज्ञस्थऋत्विजेदैवआदायार्षस्तुगोद्वयं।इत्युक्त्वाचरतांधर्मंसहकीय

तेर्थिने।सकामःपावयेत्तज्जः।षट्षट्वंश्यान्सहात्मना।आसुरोद्रविणादानात्गांधर्वःसमयान्मि
थः।राक्षसोयुद्धहरणात्पैशाचःकन्यकाछलात्।इतिएषुशूद्रस्यप्राजापत्योमुख्यः।आसुरगांधर्वौ
मध्यमौ।राक्षसपैशाचौकनिष्ठौ।तथाहमनुः।आसुरंवैश्यशूद्रयोः।षडानुपूर्व्याविप्रस्यक्षत्रस्य
चतुरोवरान्।विट्शूद्रयोस्तुतानेवविद्याद्धर्म्यानराक्षसान्।चतुरासुरगांधर्वराक्षसपैशा
चान्।तान्चतुरोराक्षसवर्जान्।कल्पतरौब्राह्मविवाहमुक्त्वाब्राह्मणानांसतामेषधर्मइत्युक्ते
ब्राह्मदैवौविप्रस्यैव।अन्येत्रयाणांतुल्याः।हेमाद्रौपाणीनतिः।राक्षसोवैश्यस्यपैशाचःशूद्र
स्यसर्वेषामार्षःप्रमाणं।प्रचेताः।पैशाचोऽसंस्कृतेषुस्तातानांप्रतिलोमजानांचेतिविशेषा
मेधातिथ्योकल्पतरौज्ञेयः।तत्रगांधर्वराक्षसपैशाचान्विनासर्वत्रोदकपूर्वदानंनियतं।स्मृ
ष्टः।नोदकेननवाचाचकन्यायाःपतिरुच्यते।पाणिग्रहणसंस्कारात्पतित्वंसप्तमेपदे।गांधर्वादिषु
पित्रादिकार्यमेव।गांधर्वासुरपैशाचाविवाहाराक्षसश्चयः।पूर्वंपरिग्रहस्तेषुपश्चाद्धोमोविधी

101/1951

श्रु॰ क॰

४०

यने॥ इत्यपरार्के वसिष्ठोक्तेः॥ अत एव होमाद्यभावे न्यस्मे दानं मात्रं तु तत्पैवं वसिष्ठ बौधायनौ बला
दपहृता कन्या पूर्वं मद्भिर्न संस्कृता॥ अन्यस्मै विधिवद्देया यथा कन्या तथैव सा॥ इदं राक्षसपैशाचप
र॥ तयोरेव बलादपहारात्॥ अकृस्यनमोमंत्राएवमनुरपि पाणिग्रहणिका मंत्रा नियतं दारल
क्षणं॥ तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे॥ अत्र पाणिग्रहणं सवर्णविषयमानं॥ पाणिग्राह्यः
सवर्णास्विति सविशेषेण याज्ञवल्क्योक्तेः॥ उदकपूर्वं कन्यादानस्य गृह्ये विकल्पः॥ तदुक्तं स्मृति
कौमुद्यां॥ ब्राह्मे॥ युक्तं तु पाणिग्रहणं सर्ववर्णेषु सर्वत्रः॥ जलपूर्वं तु विप्राणामन्येषामपि काम्य
येति॥ अन्ये त्वेतेन ब्राह्मो पि भवति अजलपूर्व कन्या मुदकपूर्वं दद्यादेष ब्राह्मो विवाह इत्याश्वला
यनेन ब्राह्मेण एव जलपूर्वतोक्तेः॥ अन्येषां षानियमः॥ सिंधौ तेयाः स्मृतिकौमुद्यां ब्राह्मे इष्टिं विना
प्रकीर्तिता शचीयोगं च योजनं॥ नांदीमुखेभ्यः श्राद्धं च पितृभ्यः श्राद्धं च पितृभ्यः कार्यमिति द्वयेवा राहसं
हितायां॥ गृह्ये स्थितां वै पुरतः तपसी माद्भ्यः मंधाममयेषु कन्या॥ सगोत्र धर्षः प्रतिरूपं दिनुपा ४०

103/1951

णिग्रहे पाणिग्रहे वा समुपागते ति॥ अथ प्रयोगः॥ कृत्स्न स्पष्टकापरिणयने मंत्ररहितक्रियामात्रं का
र्यमिति हरिहरभाष्ये॥ उक्तं तेन कांता थैव मोच्यते॥ तत्र विवाहोक्तमुहूर्ते कन्यायाः पिता भ्राता न्यो
वा बंधुर्वरगृहं गत्वा चम्यदेशकालौ संकीर्त्य करिष्यमाण विवाहांग त्वेन वाग्दानं करिष्ये इति सं
कल्प्य गणेशं च वरुणं च संपूज्य वरस्य पादप्रक्षालनं गंधवस्त्राद्यैः पूजां कृत्वा पूगीफलं नालिके
रकुंकुमादि रंजितं वस्त्रं चादाय अमुकप्रपौत्राय अमुकपौत्राय अमुकपुत्राय अमुकदासाय वराय अमु
कप्रपौत्रीं पौत्रीं च अमुकनाम्नीं कन्यां ज्योतिर्विदुक्ते मुहूर्ते दास्ये इत्युक्त्वा अव्यंगे पतिते ऽक्लीवे दश
दोषविवर्जिते॥ तत्काल उपस्थिते कन्यां पिता तु संप्रदास्यतीति॥ पितृ तु अहं दास्याम्यु संज्ञा
प्युमिति वृद्धेत्तल्लो तेल्ला नामरोगिणी चापगः॥ केचित्तु कन्यागृहे गत्वा वरं संपूज्य॥ अव्यंगे उप
तिते ऽक्लीवे दशदोषविवर्जिते॥ एतां कन्यां प्रदास्यामि देवाग्निगुरु संनिधौ इति कन्यापिता वरबंधु
हस्ते दत्वा वाचा दत्ता त्वया कन्या वरार्थं स्वीकृता मया कन्या वलोकन विधौ निश्चितं त्वं सुखी भवे

स्मृ. ५०
४१

ति कन्यापिता। आचार्य इत्यादिना कन्या वरार्थं स्वीकृता मया कन्या कृतो वृणविधो इत्युक्तेन वरपिता वदे
दित्युक्तः। ततः परस्परमर्चनं विप्रपूजादिकार्यं ततः। लोकाचारात् हरिद्रावंदनादि विवाहोक्ते मुहूर्ते
कार्यं। इति वाग्दानं। ततः पूर्वदिने विवाहदिने वा प्रातः कन्यावरयोः पिता संगं कृत्वा गृहदेविनाय
कस्थान्याहितलवादेशाकाजोमकन्या मुखस्य विवाहांगतया गणेशपूजा पुण्याहवाचनमा
तृपूजा वसोर्धारां तथा नांदीमुखश्राद्धानि करिष्ये इत्युक्त्वा स्वं पूर्ववत् कृत्वा तंदुलपूर्ण
कुंभद्वये ऽविघ्नार्थं वंशपात्रे श्यामवासुनंदिनी नलिनी मैत्री उमा पशुवर्द्धनी शचीमंगल
तो चेमा इति संनिधोः संस्थाप्य चतुर्थदिने मंडपदेवताः पूजयेत्। अन्नसूत्रेण कंकणं बध्वा
कन्यायाः सप्तभिः पंचभिर्वा कितिपं चसप्तसोपानां वेदीं कुर्यात्। चतुर्हस्तां वेदीं तिहरिहरः
वरस्य सीमांतपूजां कृत्वा गृहागतं वरं सम्मानेनोपवेशयेत् ततश्चाचार्यो वेदीमध्ये हस्तमात्रं मंडलं ४१
परि समुद्धुगोमये नोपलिप्य यज्ञियकाष्ठेन प्रागग्राल्लिखेत् उल्लेखनं कृत्वा त्रिर्मार्द्य मध्यमासु भस्मा

105
1951

ति श्रायवरस्य प्राङ्मुखस्य मधुपर्कपूजां कुर्यात्। यथा कन्यापिता समनं दत्वा तस्य पश्चात् त्रिष्टं तेवर
मादस्य धुनवा नाम्नां मर्चयिष्यामो भवंतमिति। अर्चयेतिवरः। ततो विष्टरो ऽसमन्नेत्रि ह्यक्ते दाता
प्रसंड्मुखस्तिष्टन्प्रतिगृह्णतामिति। कूर्चपंचविंशतिकुशमयं चदद्यात्। तं वर आसनस्य पश्चा
त्तिष्टन्नां महीन्यावि ष्टरायन मङ्ना सने दत्वोपविशेत् ततो ऽन्येन त्रिः पाद्यमित्युक्ते गंधद्रव्याक्षता
युतं पाद्यंस्थात्रं प्रतिगृह्णतामिति निवेदिते ऽन्यवरभ्यादेशोस्ययंततो दक्षिणमिति पादौ प्रक्षालयेत्
ततो दत्तात्रेविस्य मस्ये नेत्रिर्निवेदितमाद्यापवरपादाधो दद्यात्। ततो गंधपुष्पाक्षतकुशतिलसर्ष
पदधिदूर्वायुतमर्घ्यमाद्यान्येनार्घ इति त्रिरुक्ते दाता प्रतिगृह्यतामिति दद्यात्। वरस्तमंजोन
मद्गृह्य जलिनादायाशिरस्यभिवाद्यान्त्मो क्षिपेत्। ततो ऽन्येनाचमनीयमिति त्रिरुक्ते दत्तं प्रतिगृह्य
सकृदाचामेत् ततो ऽन्येन मधुपर्क इत्युक्ते दत्तं कांस्यस्थ तेनैवापिहितं दधिमधुघृतं वा
वरोदातृहस्तस्थमुद्घाट्य सवित्रेनमदन्तमीक्ष्य सवित्रेनमइतिप्रतिगृह्य वामे धाय मधुपर्कपिधन।।

मध्यमनामिकयालोड्यानामिकांगुष्ठाभ्यां बहिः क्षिप्त्वा पुनरेवं द्विः कृत्वा नाम्नामेव त्रिः प्राश्नीयात्
॥मधुपर्काय नम इति वाऽथ अंगुष्ठानामिकयाद्वितीयमंगुष्ठमध्यमाभ्यां तृतीयमिति तस्मात्त्रिको मुखं
संततः शेषमसंचरे निनीयाद्भिराचम्य वाचे नमः मुखे॥ प्राणाय नमः नसोः चक्षुभ्यां चक्षुषेः॥
श्रोत्राभ्यां कर्णयोः बलायेति बाह्वोः ओजस इत्यूर्वोः अंगेभ्यः इत्यंगेषु॥ ततोऽन्येन त्रिगोरिति
प्रतिगृह्य रूपालंभमात्रेव कृत्वा हुत्वेत्यादित्यस्य स्तोत्रं वै नमः॥ प्रमार्च्य कस्य च पात्राहतस्यैः
श्रुत्वा कुजतत्त्रणान्मुत्तुरन्तु देवैर्विसर्जनात्॥ ततो दानावस्त्रालंकारगंधस्रगाद्यैर्वरं पूजयेत् ततः मु
लग्नेंतः पटं धृत्वा मुखं निरीक्षेत् अथ तु ज्यसमये पाणिग्रहणमिच्छंति तत्रांतःपटमपसा
र्य वरो वधूमुखमीक्षेत। कन्यापि हस्तवस्त्रचतुष्टयमध्ये दृष्ट्वा युष्मती संवासः परिधत्ते तं आधु
मादद्यात्॥ सा च वाससीनम इत्यूत्वा परिदध्यात्॥ ततो दात्र वधूमीक्षस्वेति प्रेषितो वधूमीक्षेत
॥ततः कन्यादानमिति हरिहरः॥ अन्ये तु कन्यादानोत्तरं वस्त्राच्छादनमाहुः॥ ततः करोतु स्वस्तिनेत्रादेः

107
1956

द्धे रक्षनारीपणांने कन्यापितोदङ्मुखः स्वदक्षिणे पत्नीमुपवेश्य कुशपाणिराचम्य देशकालौ संकी
र्त्य॥ मम समस्तपितृणां निरतिशयसानंदब्रह्मलोकावाप्त्यादिकन्यादानकल्पोक्तफलावाप्तये
अनेन वरेणास्यां कन्यायामुत्पादयिष्यमाणसंतत्या ब्राह्मणपक्षे द्वादशावरान् द्वादश परान् प्राजाप
त्यपक्षे अष्टाववरानष्टौ परान् पुरुषान् पवित्रीकर्तुमात्मनश्च श्रीलक्ष्मीनारायणप्रीतये ब्राह्मवि
वाहविधिना प्राजापत्यविधिना वालंकृतकन्यादानमहं करिष्ये इत्युक्त्वा पठेत्॥ कन्यां कनकसंप
न्नां कन्यकाभरणैर्युतां॥ दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया॥ विश्वंभरः सर्वभूतः साक्षि
ण्यः सर्वदेवताः॥ इमां कन्यां प्रदास्यामि पितॄणां तारणाय चेति॥ ततः कांस्यपात्रे वस्त्रस्था परि
धृते स्वस्य स्यवरहस्तेऽसुमोक्षितमस्तु शिवा आपः संतु सौमनस्यमस्तु इत्युक्त्वा कन्यातारयतु
पुण्यं वर्धतां अरिष्टं शान्तिरस्तु तुष्टिरस्तु तिथिकरणमुहूर्तनक्षत्रसंपदस्तु पुण्याहं भवंतो ब्रुवंतु पु
ण्याहमिति विप्राः स्वस्ति भवंतः ऋद्धिं भवंतः श्रीरस्त्विति भवंतः॥ अमुकदासोऽहं मम समस्तपि

र्पणामिन्माहिलक्ष्मीनारायणप्रीतये इमं तेभ्यो भार्गवदुत्रा काश्यपगोत्रस्य अमुकदासस्य प्रपौत्रा
य विष्णुदासस्य पौत्राय शिवदासस्य पुत्राय काश्यपगोत्राय देवदत्तदासाय वराय काश्यपगो
त्रां चैत्रदासस्य प्रपौत्रीं मैत्रदासस्य पौत्रीं जन्नदासस्य मम पुत्रीममुकां प्रेष्यां नीरुत्रीं वा कन्यां प्र
जापतिदैवत्याय यथाशक्त्यलंकृतामित्युक्त्वा पुनरेवं ब्रूयात् वर्षज्ञानूत्पोतिष्ठोमातिरात्रफलसम
मफलप्राप्तिकामः प्रजोत्पादनार्थं सह धर्मचरणार्थं प्रजापतिप्रीतये सहधर्मं चरतेत्यक्त्वानन्तु मम
इमं प्रदद्दे इति कुशाक्षतपुतं जलं कन्याहस्तं च वरहस्ते क्षिपेत् ॥ मया दिदं तेति मातापितृवृद्धैतिके
चित् सगोत्रोच्चारणं नेति केचित् वरः प्रतिगृह्णामि स्वस्तीत्युक्त्वानुवंदेत् ॥ गौरीं कन्यामिमां मनिर्वय
यात्राक्रिविन्दषितां ॥ गोत्राय चैव दासाय तुभ्यं दत्तां समाश्रय ॥ कन्ये ममाग्रतो भूयाः कन्ये मे देवि
पार्श्वयोः ॥ कन्ये मे पृष्ठतो भूयास्त्वद्दानान्मोक्षमाप्नुयां ॥ मम वंशकुले जाता पालिता वत्सराष्टकं तुभ्यं
दास मया दत्ता पुत्रपौत्रविवर्धिनी इति पठेत् ततः कन्यादानप्रतिष्ठार्थमिदं सुवर्णं गोमिथुनं च दद्यि ४३

व

109
1951

णं सम्प्रददे इति दद्यात् ॥ ततः शाक्तौ संप्रांतास्त्रकांस्यपात्रं गवाम्बुदासीदासादि दद्यात् कन्यावाध
वाश्चर्योतकं दद्युः ॥ कुरस्नमित्रार यो पिदद्युरिति केचित् होमानेतो ॥ केचिदाहुः ॥ ततः चतुर्वासं चवा
रवावधूवरौ सूत्रेण वेष्टयेत् परितनमधो मार्गेण धम्लनं चोपरि निःकाश्यपत्रिगुणं पीतं च हस्ताधस्तनं
वरहस्तोपरितनं च वधूहस्ते कंकणं बध्नीयात् ॥ येन बद्धो बली राजा दानवेन्द्रो महाबलः तेन त्वा
म पिबध्नामि रक्षे मा चल मा चलेति ततः वधूवरान्योन्यं माहूताशीर्पणं ॥ वध्वाहस्ते वरेण च
कार्यं मंत्रास्तु गायत्र्या मध्ययनमः ॥ पञ्चायनमः ॥ श्रियै धर्माय ॥ प्रजायै ॥ पशुभ्य इति ॥ ततः प्राङ्मुखाय उप
वेशयेत् वस्त्रैकन्यायै दद्यात् सा च वासो धेहि नम इति परिदध्यात् ॥ ततो वा रोमांगं स्पंतंतुनानेन म
न्त्रेण जीवनहेतुना कंठे बध्नामि सुभगे सा जीव शरदां शतमिति सो मा गणतं तु वधूगले बध्नीयात् ॥ त
तो विश्वेदेवा पूर्मानभिश्रुधान्त्योनम इत्विधर्मीसेत् अत्र ब्राको सुन संस्त्रेण कंकणं ॥ ततो वेद्यां
प्राङ्मुखो तेजनीवीरण कटेपश्चाद्ग्रेरुपविशपदृश्शिरोऐ शान्यां वा मंगलं कुंभं स्कंधे गृहीत्वा क

मू.कृ.०
४४

श्चिन्निष्टिहोमसप्तमं प्रहृत्य अग्नेरुत्तरपलीचासनं कृते निधायात्र वरः कन्यानामक्ष्येदिताच्चारः ततो वधू
पित्रा परस्परं समीक्षितव्यमिति सूक्तेनान्योन्यं समीक्ष्य अघोरचक्षुरपतिघ्नी शिवा चसुमनाः सु
वर्चाः पुत्रसूर्देवकामा च सुखदा नवेति । वरो देवतं सोमगंधर्वाग्निपूषमो नम इति च श्रूद्राणां गृह्य
सूत्राद्यथनानावाक्त्वाद् ऋहोमागकृआपस्तानाभावात्सुस्पृष्क्षिणां कन्यानां वा विवाहे होम एव नास्तीति
मदनपालः । अन्ये तु मध्याने धिकारतिद्दोस्य पजीष्टिवंहगे पिञ्चवर्णापरे शास्त्रिनास्तानसंभवात
होममाहुः यथा गुरुर्दक्षिणेन ब्रह्मासनं दत्वा तत्सुपवेश्य मन्त्रमये पात्रे जलपूर्णं कुशाग्नि
धायोत्तरतः कुशानुनिधायाग्निं दर्भैः पूर्वादि परिस्तीर्य सारनं कुर्यात् । त्रीणि तृणानि द्विपवि
त्रे प्रोक्षणी माज्यस्थाली चरुस्थालीं संमार्गकुशाः । उपयमनकुशाः तिलाः समिधः स्रुवस्रु
जौ तंदुलाः लाजाः शूर्पं संस्थापयत्रे अग्न्युत्तरपाश्चात्तुदुहं चर्मगादौ क्षिणेन निततनः श्रारे ग्रामा च्छि ४४
च्छिन्नौ प्रोक्षणीः संस्कृत्य पवित्राभ्यामुत्पूय तत्रेते निधाय दक्षिणेन सव्येन कृत्वा रिंगनं कृत्वा पात्रा

11/1951

णि प्रोक्ष्य निधायाज्यं स्थाल्यां निरुप्याग्नेर्दक्षिणे धिश्रि सोल्मुकेन लजैः सह पर्यग्निकृत्वाग्न
दं प्रतप्य कुशैः संमृज्य प्रोक्षणीभिः प्रोक्ष्य पुनः प्रतप्य दक्षिणे निधायाज्यमुत्पूयोत्पूयावेक्ष्याग्नि
कं निरस्य पुनः प्रोक्षणी रूपावेक्ष्योपयमनकुशानादायोत्थाय तिलाः समिधो माधाय प्रोक्षणी
भिः पर्युक्ष्य वरेणान्वारब्धो गुरुर्दक्षिणं जान्वाच्य ब्रह्मणा दक्षिणे हस्ते वा रब्धः स्रुवेण जुहुयात
। प्रजापतये नमः इन्द्राय नम इत्याघारौ । इदं प्रजापतये न ममेत्यादि करः सर्वत्र त्यागं कुर्यात्
। अग्नये नमः सोमाय इत्याज्यभागौ । अग्नये वायवे । सूर्याय । अग्नीवरुणाभ्यां । द्विः । अग्नये
वरुण सवितृ विष्णु विश्वेदेव मरुत्स्वर्केभ्यो नमः वरुणायादित्यायादितये प्रजापतये नमः इति नव आ त
नस्विष्टकृते अग्नये नमः त्व वै चतुर्जुहुयात् नवा ततः कन्या जलाद्युपस्तीर्य विधाः । ज्ञातान् अस्थानीवान्यः शामीप
लाजान् शूर्पीहंज जलिनाद्भिः क्षिपति । ततो निष्ठायां तिष्ठती । अग्नये नम इति त्रिर्जुहुयात् । मंत्रो व
रस्पेवा न नोर्वरीव ध्या दक्षिणं हस्तं सांगुष्ठमुत्तानमुत्तानेन हस्तेन गृह्णीयात् । तत्र मंत्रः । भगायमा

स्मृ.द०
४५

सवित्रे स्वाहा नमः॥ चित्र सोमप्रगुणो पुंक्लावीरसजीवसूर्त्वकुलेमहीये सम्राज्ञी॥ मश्विश्रानुगतास्वदेति
॥ ततो गृहीतामेव वधूमुत्तरतो ग्नेर्दक्षिणेन पदा ईश्मानमारोहयति॥ कन्यायै नमः इति॥ ततः सरस्वत्यै
नमः इति॥ वताभ्यां गायां मंति॥ ततोऽग्रये नमः इत्यग्निं परिक्रम्य पुनर्दिर्लाजादि पूरिकर्मा तूष्णीं त्वा च
तुर्थं स्रुवपुटेन वधू जाता सर्वलाजान्कन्यांजलावावपति॥ तान्नगाय नमः इति जुहोति॥ ततो
पि चतुर्थं परिक्रम्य पवित्रपत्रस्तात्वा रथ्यकः प्रजापतये नमः इति कृत्वोत्तरतः उदक संस्थाप्य
मतंदुल पुंजान्कृत्वा वधूं विष्णवे नमः इति दक्षिणेन पदा वरसमप्रपदानि क्रामयति इषे नमः॥ वि
ष्णवे नमः॥ सर्वत्र ऊर्जे॥ रायस्पोषाय॥ मायोभवाय॥ प्रजाभ्यो॥ ऋतुभ्यो॥ सखिभ्यो नमः इ
त्येते सप्तके चिता॥ ततः सप्तमे पदे गुरुर्द्दयो॥ शिरसी सन्निधाय पूर्वकुंभोदकेन वरस्त्वा स्नापयन्
नेरन्त्र पि चेत॥ वरेण सूर्यमुदीक्षस्वेत्युक्ता सूर्याय नमः इति सूर्यं पश्येत॥ मम व्रते वधि त्वाम्प्रोनमः इ
ति दक्षिणांसोपरि हस्तं नीत्वा हृदयमालभ्य उत्तरतो वधूमुपवेश्य वधवे नमः इमा इमं त्वेना: ४५

113/19351

सीमंते सिंदूरं दत्वा प्रोवरो वा वधूमुत्थाप्य गोश्वपुरुषेभ्यो नमः इत्यानडुहे रक्तचर्मणि वधूमुपवेश्य
ग्नये स्विष्टकृते नमः इति कृत्वा संस्रवप्राशनं॥ प्रणीताप्रवित्राभ्यां मार्जनं॥ त्र्यायुषं॥ रेग्ग्रोक्षेपः॥ ब्रह्मचार्पा
युगोद्दानं॥ प्रणीताविमोकः॥ ब्रह्मणे पूर्णपात्रं॥ विभिस्त्रामान्त्र संकल्पः दिने विवाहे रात्रौ ध्रुवमु
दीक्षस्वेति वरप्रेषिता वधूर्ध्रुवाय नमः इति पश्येत॥ ततो वधूवरौ त्रिरात्रं षड्रात्रं त्रिरात्रं वा क्षा
रालवणादिनौ ब्रह्मचारिणौ वर्तं कुर्वाणौ वधूः ऊपिनोरंयता स्यातां॥ तैलाक्षत चंदनादि यथा
चारं कुर्यात्॥ चतुर्थ्यामपररात्रे पंचम संस्कारान्कृत्वा विवाहाग्निं संस्थाप्य ब्रह्मोपवेशनादि स
मिदाधानां प्राग्वत्कुर्यात्॥ तत्राज्यं निरुप्य स्थाल्यां तूष्णीं चरुं निरूप्य तथैव प्रोक्ष्य त्रिः प्रक्षाल्य पा
ग्नो वहन्सा समिधा माधाय प्रयुर्पसादि राज्यभागांते ग्नये प्रायश्चित्ताय नमः॥ एवं वायवे सूर्या
य चंद्राय गंधर्वाय॥ हुत्वा कृतं ते प्रजापतये नमः इति चरुं हुत्वा दिरं कुंभात् स्थलपाना दापाग्निवा
युसूर्यचंद्रनक्षत्रगंधर्वप्रजापतिभ्यो नमः इति वधूशिरसि दत्वा मप्रभाग्नतनुस्वादिष्टानवेस्यु

श्र.सं.
४६

त्रस्तोमेभ्य ऋत्तोषंमाणेभ्यो नमः॥ अस्थिभ्यो मांसेभ्यो ऽलचेन मइति वधूं प्राशयित्वा ताम्राचम
प्याज्येनाप्ययेत्स्विष्टकृतेन मइति कृत्वा अग्न्यादि प्रजापत्यन्ता नवाकृतयः प्राशनार्थं भिन्नपात्रे संस्रवः
॥ संस्रवप्राशनं मार्जनं पवित्रप्रतिपत्तिर्गुरवे दक्षिणा ब्रह्मणे पूर्णपात्रमाम्नात्रदानं चेति॥ स्मृति
कौमुद्यां तु अत्र स्यकोपि होमो नेत्युक्तं तत्र। सामतापि हि तेनैकमणतामत्रा कृतिव्रते रित्यस्य अ
देष्यविशेषात्॥ ततो वरस्य तस्य क्षीपाणं पूजनं वरमात्रे वंशपात्रदानं च कार्यं कन्यापित्रेति
केचित् षोडशोलघुअर्घयुतवंशपात्रे उमामहेश्वरौ संपूज्य समर्पयेत्। गौरि गिरिशतु मुमादेवी
मूर्ते त्रो गिरिजापतिः॥ अतस्तां पूजयिष्यामि गौरि एणी सर्वकामदा॥ सवस्त्रां च सदीपां च शूर्पे
षोडशभिर्युतां। वरमात्रे प्रदास्यामि कन्यादानस्य सिद्धये इत्युक्त्वा ह। तस्य कन्यादानस्य संपू
र्णफलमवाप्स्यामि इदं वंशपात्रं वरमात्रे संप्रददे न मम इत्युक्त्वा पवेत्। एवं वंशो वंशकरः श्रेष्ठो वंशो वं
शादि वर्द्धनः॥ अनेन वंशदानेन तुष्टो ऋद्धिं करोतु मे। वंशपात्रमिदं पुण्यं वंशजातमस्तु वांछना ४६

115
1951

तांस्तु तमं दानमतः शांतिं प्रयच्छ मे इति॥ इदं केचिन्न कुर्वन्ति॥ ततः कन्यापिता अष्टवर्षाणि कन्या
पुत्रवत्पालिता मया। इदानीं तु मया तुभ्यं दत्ता स्नेहेन पाल्यतामिति वरांके वधूमुपवेशयेत्। त
तो वरो यानेन वधूसह गृहं गत्वा तत्राग्निं संपूज्य स्थापितानां मातृणां मंडपदेवतानां च पू
जां कृत्वा विसृज्य वस्त्रग्रंथिकंकणमोक्षं कृत्वा विप्रान्पूजयेत्। वधूगृहप्रवेशो मंडपोद्वासनेका
लोन्य अविशेषो मत्कृते निर्णयसिंधौ ज्ञेयः एते संस्काराः सशूद्राणां॥ एवं च स्मार्तमाह्निकाद्य
पि तेषां नियतं। असच्छूद्राणां तु विवाहमात्रं॥ इति श्रीमन्नारायणभट्टसूनुरामकृष्णभट्टसू
नुकमलाकरभट्टकृते शूद्रधर्मतत्त्वे शूद्रसंस्काराः। अथ शूद्रस्याह्निकमुच्यते। तत्र विष्णुः॥ ब्रा
ह्मे मुहूर्ते उत्थायेति। विष्णुधर्मे चायनाद्युत्थितो यस्तु कीर्त्तयेन्मधुसूदनं। कीर्त्तनात्तस्य पापानि
नाशमायान्त्यशेषतः। तेन च स्मृपितरो विष्टदेवं चैनं त्वा। प्रातः स्मरामि भवभीतिमहार्त्तिशांत्यै नारा
यणं गरुडवाहनमंजनाभं। ग्राहाभिभूतवरवारणमुक्तिहेतुं चक्रायुधं तरुणवारिजपत्रनेत्रं॥ प्रातर्न

मू.प्र.

५७

मामि मनसा वचसा च मूर्ध्ना पादारविंदयुगलं परमस्य पुंसः॥ नारायणस्य नरकार्णवतारणस्य पा-
रायणप्रवणविप्रपरायणस्य॥ प्रातर्नजामि भजतामभयंकरं तं प्राक्सर्वजन्मकृतपापभयापहत्यै
ह्रस्तो यो ग्राहवक्त्रपतितं घ्रिगजेंद्रघोरशोकप्रणाशमकरोद्धृतशंखचक्रः॥ श्लोकत्रयमिदं पु-
ण्यं प्रातः प्रातः पठेत्तु यः॥ लोकत्रयगुरुस्तस्मै दद्यादात्मपदं हरिः॥ प्रातः स्मरामि शिवमेक-
मनेकमाद्यमित्यादि यथावासनं पठित्वा॥ पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः॥ पुण्य-
श्लोका च वैदेही पुण्यश्लोको जनार्दन इत्युक्त्वा भूमिं नमस्कृत्य अंतर्धाय तृणैर्भूमिं शिरः प्रावृत्य
वृतसा॥ वाचं नियम्य यत्नेन निष्ठीवोच्छ्वासवर्जितः॥ कुर्यान्मूत्रपुरीषे तु शुचौ देशे समाहित इत्यं-
गिरसोक्तविधिना॥ दिवासंध्यासु उदङ्मुखः॥ कुर्यान्मूत्रपुरीषे तु रात्रौ चेद्दक्षिणामुखः॥ ग्रामास
दृशातं गच्छेन्नाराच्च चतुर्गुणमिति याज्ञवल्क्यपराशराभ्युक्ते देशे मूत्रपुरीषे कृत्वा॥ अपरस्य च वि-
षमूत्रं काष्ठलोष्ठतृणादिनेति भरद्वाजोक्ते लोष्टादिना वामेन गुदं प्रमज्य गृहीतशिश्नश्चोत्थाय ५८

117/1951

मृद्भिरभ्युद्धृतैर्जलैः॥ गंधलेपक्षयकरं शौचं कुर्यादतंद्रित इति याज्ञवल्क्योक्तेः॥ शौचं कुर्यात्॥ त
त्रमलेन्नानातपः॥ एका लिंगे करे सव्ये तिस्रो द्वे हस्तयोर्द्वयोः॥ मूत्रे शौचं समाख्यातं शुक्रे तद्द्विगु-
णं भवेत्॥ पुरीषे तु दक्षयमौ द्वे लिंगे मृत्तिके देये गुदे पंच करे दश॥ उभयोः सप्त दातव्या मृदः शौ-
चे पपादिकृ॥ द्वादश॥ मेहने मृत्तिकाः सप्त लिंगे द्वे परिकीर्तिते॥ एकस्मिन्विंशतिर्हस्ते द्वयोर्ज्ञेयाश्च-
तुर्दश॥ एको वामा॥ तिस्रस्तु मृत्तिका देयाः कर्तुर्वै नखशोधने॥ तिस्रस्तु पादयोर्ज्ञेयाः शौचकाम-
स्य सर्वदा॥ विष्णुपुराणे॥ एका लिंगे गुदे तिस्रो दश वामकरे तथा॥ उभयोः सप्त दातव्या मृदः शौचो-
पपादकाः॥ अत्र न्यूनाधिकत्वं वाऽस्यां गृहिपस्यादिपरतया वा व्यवस्था॥ मूत्रे मसरिमाणमृ-
दद्दक्षः॥ लिंगे तु मज्जमारख्याता त्रिपर्वपूर्वैतेपया॥ गुदे तु मनुः॥ आर्द्रामलकमात्रा तु प्रथमा मृत्ति-
का स्मृता॥ द्वितीया च तृतीया च तदर्धार्धा प्रकीर्तिता॥ आदिपुराणे॥ [illegible] यावदर्हमानेन शौचं च मोक्षम-
नीषिभिः॥ उक्तशौचे न गंधानपगमे तु देवलः॥ यावत्साधितिमन्येत तावच्छौचं विधीयते॥ दक्षः॥ यदिवा

श्रु.कं० हितं शौचं नरः कुर्यान्निशि सम्मतो । तदर्धमातुरे प्रोक्तमातुरस्यार्द्धमध्वनि वृद्धपराशरः ॥ उपविश्य तु विण्मूत्रं
४८ कर्तुं यस्तु न विन्दति स कुर्यादर्धशौचं तु स्वस्य शौचं स्य स बुद्धिमान् । बालस्यानुपनीतस्य गंधलेपक्षयाव
हा । स्मृ.दे विवाहात्प्राग्गेवं विवाहान्नावतु द्वादशवर्षी धषोडशवर्षी ध्रुवा सर्वे धर्मा नियताः । नन्वा
कु ॥ एतच्छुव ब्याघ्रः ॥ भोजने गुदस्नावे हृदस्यात्तिः भुञ्जानस्य तु विप्रस्य कदाचित्स्रवते गुदं उर्ध्वं कृत्वा
तु शौचं तु ततः पश्चादुपस्पृशेत् । ततः कृत्वोपवासं च पंचगव्येन शुध्यति । हस्तौ प्रक्षाल्य शौचं कृत्वा गंड
षान्तरमुपवसेद्विसंध्यां । विप्रस्यैतु फलक्षणं ॥ इति कमलाकरकृते शूद्रधर्मतत्त्वे शौचविधिः ॥ अथा
चमनं । स्मृ चौंदे शौपाङ्मुख उदङ्मुखो वोपविश्य पातजानुकरं गोकर्णवद्धिहस्तं कृत्वा तालुगाभिः शुद्ध
भिरफेनाभिरद्भिः सद्भिर्दाचामेत् त्रिर्वीतिः स्मृतिकौमुद्यां अंगुष्ठमात्रस्य हेतिगोडाः । ततोंगुष्ठमू
लेनाष्ठौ द्विरुन्मृज्यांगुष्ठतर्जनीभ्यां नासिके अंगुष्ठमध्यमाभ्यां चक्षुषी । अंगुष्ठानामिकाभ्यां श्रोत्रे
अंगुष्ठकनिष्ठिकाभ्यां नाभिं पाणितलेन हृदयं सर्वैः शिरो बाहू च स्पृशेत् । अथ दन्तधावनं । परः तु नग

119/1951

पलाशार्कपुनर्नवकरंजाम्रजातीबिल्वप्रियंगुमयं कंटकिक्षीरवृक्षे द्वादशांगुलकं विप्रे काष्ठमा
हुर्मनीषिणः ॥ क्षत्रविट्शूद्रजातीनां नवषट्चतुरंगुलमिति मदनपारिजाते विष्णुः । कनिष्ठि
काग्रस्थूलं सपर्वार्द्धकृतं कूर्चं दंतधावनं प्रक्षाल्य भक्षयेत् आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च । ब्रह्मप्रज्ञां
च मेधां च त्वं नो धेहि वनस्पते इति मंत्रेण प्राङ्मुखो भक्षयित्वा दंतान् संशोधयेत् तथैव जिह्वा छेदं कृत्वा
पाच्यामुदीच्यां वा त्यजेत् । षोडश द्वादश वा गंडूषान्कुर्यात् । एतत्प्रतिपन्नवमीषष्ठीमावास्यापौर्णमासीच
तुर्दशीपष्ठमीसंक्रमश्राद्धव्रतरविदिनेषु च कार्यं । तत्र द्वादशगंडूषा । ततः केशप्रसाधनं कृत्वाचा
यात् । छंदोगपरिशिष्टे । यथाह नित्यात्मार्तनिःसंस्नायादनातुरः । दंतान्प्रक्षाल्य नद्यादौ गृहे चेत्तद
मंत्रवत् । स्मृतिकौमुद्यां योगियाज्ञवल्क्यः । मलिनांगो मयश्चनो मुष्णाणि सुरश्रीणि च । आहरेत्स्ना
नकाले तु स्नानार्थं प्रयतः शुचिः । गत्वोदकांतं प्रक्षाल्य संस्थाप्य तत्र पृथक् क्षितौ । त्रिधा कृत्वा मृ
दं तां तु गोमयं च विचक्षणः । अधमोत्तममध्यानामंगानां क्षालनं तु वै । अंगैः पृथक् पृथक् कुर्यात्

स्मृ.८०
४९

क्षालने मरसंकरः॥ अङ्घ्रिमर्दितस्य चरणे प्रक्षाल्याचम्य वैष्णवीं विभः॥ अङ्घ्रिमर्दितस्यगात्रे कमण्डल
वने जपेत्॥ एकया च त्रिरो वसितव्यं स्नाने न च स्थीपरिनाभिवस्त्र जंघे च चरणे च त्रिसलिलैः
॥ प्रक्षाल्य हस्तौ चाचम्य नमस्कृत्य जलं तु तत्॥ अमलं किंचेदं तु मंत्रेण नमस्ये समयतां जलं॥ अमृतो द्विजानां
स्नानं त्रिविधिना स्नानमुक्तं त्वं॥ ब्रह्मक्षत्रविशां त्वेव मंत्रवत् स्नानमिष्यते॥ तूष्णीमेव तु शूद्रस्य सन
स्कारकं मतं॥ अनेन शूद्राणां कातीय एवा मंत्रः स्नानविधिरपि पिलश्रीरत्नेन तु पाद्याक्तं स्नानं सर्व
वर्णसाधारणमुक्तं यथा॥ अनुद्धृतैरुद्धृतैर्वा जलैः स्नानं समाचरेत्॥ तीर्थं प्रकल्पयेद्विद्वान्मू
लमंत्रेण मंत्रवित्॥ नमो नारायणायेति मूलमंत्र उदाहृतः॥ दर्भपाणिस्तु विधिना आचान्तः
प्रयतः शुचिः॥ चतुर्हस्तसमायुक्तं चतुरस्रं समंततः॥ प्रकल्प्यावाहयेद्गंगामेभिर्मंत्रैर्विचक्ष
णः॥ विष्णोः पादप्रसूतासि वैष्णवी विष्णुपूजिता॥ पाहि नस्त्वेनसस्तस्मादाजन्ममरणा
न्तिकात्॥ तिस्रः कोट्योऽर्धकोटी च तीर्थानां वायुरब्रवीत्॥ दिवि भुव्यन्तरिक्षे च तानि ते सन्ति जा

121/1951

ह्नवि॥ नंदिनीत्येव ते नाम देवेषु नलिनीति च॥ दक्षा पृथ्वी च सुभगा विश्वकाया शिवामिता॥ वि
द्याधरी सुप्रसन्ना तथा लोकप्रसादिनी॥ क्षेम्या च जाह्नवी चैव शांता शांतिप्रदायिनी॥ एतानि पु
ण्यनामानि स्नानकाले प्रकीर्तयेत्॥ भवेत्संनिहिता तत्र गंगा त्रिपथगामिनी॥ विष्णुना यं
पुनर्वाय्यः॥ सप्तवारान्जपेन्नकरसंपुटयोजितं॥ आरुक्मूलमंत्रेण तत्त्वार्थः॥ मूर्ध्नि कुर्याज्ज
लं पश्चात्त्रिचतुः पंचसप्तवा॥ स्नानं कुर्यान्मृदा पश्चादामंत्र्य च विधानतः॥ अश्वक्रांते रथक्रां
ते विष्णुक्रांते वसुंधरे॥ मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतं॥ उद्धृतासि वराहेण कृ
ष्णेन शतबाहुना॥ नमस्ते सर्वलोकानां प्रभवारणि सुव्रते॥ इति॥ एतत्सर्वोक्तवचनेन शूद्रस्य विधि
प्योक्तेरत्र न दर्भावासौराणमंत्रपाठे शूद्रस्यानधिकाराद्विचिंत्यं तत्वेपि सर्वेषां सर्वोक्तेनाम्मस
मुत्थापयेदिति तत्त्व॥ नृसिंहपुराणे॥ नद्यां तु वसुचलायात्मति स्नातास्थितो द्विजः॥ तडागादिषु॥
तोयेषु नोयेषु प्रसक्तं स्नानमाचरेत्॥ कातीयानानाचाममपि सर्वमुखमाह्नानं॥ तत्रैव ब्रह्माण्डपु॥

श्रा॰ कौ॰
५०

रागो॥ ऊर्ध्वपुंड्रं द्विजः॥ कुर्यात् क्षत्रियः त्रिपुंड्रकं॥ अर्द्धचंद्रं तु वैश्यस्य वर्तुलं शूद्रजातिषु॥ इत्युक्तं जला
दृशिरः कंठ बाहु हृदयेन्वा निरष्ट पार्श्वद्वयेषु तिलकं कृत्वा कुशासनोपविष्टः॥ नमो नम इति
त्रिर्जपित॥ अथ तर्पणं॥ व्यासः॥ एकैकमंजलिं देवा द्वौ द्वौ तु सनकादयः॥ अर्हंति पितरस्त्री
स्त्री न्स्त्रियस्त्वेकैकमंजलिं॥ मातृवर्गं ज जित्र यमेकैकस्य॥ विष्णुपुराणे तु त्रिरपः प्रीणना
र्थाय देवानामपि निर्वपेदिति देवेत्रय उक्ताः॥ पाद्मे॥ देवान्ब्रह्म ऋषीन्सर्वांस्तर्पयेताक्ष
तोदकैः॥ तर्पयेत पितॄन्भक्त्या सतिलोदकचंदनैः॥ शांखः॥ सौवर्णेन राजतेनौदुंबरेण
खड्गपात्रेण शंकुना वा प्युदकं पितृतीर्थे स्त्रानं दद्यात् योगियाज्ञवल्क्यः॥ तिलानाम
लाभे तु सुवर्णरजतान्वितं॥ तदभावे निषिंचेत्तु दर्भैर्मंत्रेण वाप्यथ॥ दर्भ्यतिति समुद्रा
भेदप्यतामितस्यापि वा॥ विधिज्ञो निक्षिपेत्रायं देवादीनामशेषतः॥ सव्यं जानु ५०
तलो न्वा च समन्विलं दक्षिणामुख इति ते नौ वोक्तं देवेष्वार्द्र क्षिणे जानुपातः [illegible]

123
1951

यथा होहस्तौ युग्मतः कृत्वा पूरयेदुदकांजलिं॥ गोश्रृंगमात्रमुद्धृत्य जलमध्ये जलं क्षिपेत्॥ तारक्षः अपो प्यु
तर्पयेद्देवान्मनुष्यान्कुशमध्यतः॥ पितॄंस्तु कुशमूलाग्रैर्विधिः कौशोपथो यथाक्रमं॥ मरत्स्या दिजातेयो
ग्याज्ञवल्क्यः॥ ब्रह्माणं तर्पयेत्पूर्वं विष्णुं रुद्रं प्रजापतिं॥ देवान्छंदांसि वेदांश्च ऋषींश्चैव सनातनान्॥ अप्सरा
गणांश्चैव गंधर्वान्नागांश्च पर्वतानयांस्तथा॥ संवत्सरं सावयवं देवीश्चाप्सरसस्तथा॥ तथा देवानुगान्नागान्साग
रान्पर्वतान्नदीः॥ सरितो थ मनुष्यांश्च यक्षान्रक्षांसि चैव हि॥ पिशाचांश्च सुपर्णांश्च भूतान्यथ पशूं
स्तथा॥ वनस्पतीनोषधीश्च भूतग्रामं चतुर्विधं॥ विष्णुः॥ ततः कृत्वा निवीतं तु यज्ञसूत्रमतंद्रितः॥ प्राजा
पत्येन तीर्थेन मनुष्यांस्तर्पयेत्पृथक्॥ कार्ष्णाजिनिः॥ सनकः सनंदनश्चैव तृतीयश्च सनातनः॥ कपिलश्चा
सुरिश्चैव वोढुः पंचशिखस्तथा॥ पाद्मस्यानंतरे मरीचिमत्र्यंगिरसौ पुलस्त्यं पुलहं क्रतुं॥ प्राचेतसं व
सिष्ठं च भृगुं नारदमेव च॥ योगियाज्ञवल्क्यः॥ अपसव्यं ततः कृत्वा जानुं कृत्वा च पितॄन् दिङ्मुखः॥ पितॄन्दि
व्यानदिव्यांश्च पितृतीर्थेन तर्पयेत्॥ दिव्याधरो ध्रुवस्वस्यपरयोवसवः अजैकपाद्दयोरुग्रोर्इं धाताद य

आरिसाश्वमत्येकं समुद्दिताया। स एव। कम्बलेनलंसोमंयममर्षमणेनतया। अग्निष्वात्ताः सोमपाश्च
तथा बर्हिषदोपिवा। यद्दिष्मा ज्ञोवपित्र्कारणतानिद्या न्नरापिरन्न। तर्पणेयद्यप्यनेकेप्रकाराः स्मृ
तिकौमुद्यां पाखारांभुक्ताखलथापिकात्यायनमतसंवादाच्छन्दोगा वाजसनेयिन इतिगौडोक्तद्रष्टसं
वाद। क्वानादौद्दर्शनाद्वयोगयाज्ञवल्क्योक्तएवायंप्रकारः। स्मृत्यर्णामितितत्वं। एवंवेभ्रष्टे वाद्य
पिकातीयमेव। अथप्रयोगः। मृत्सोमयकुशतिलपुष्पाक्षतान्नादायनद्यादौगत्वापाणिपादौप्र
क्षाल्यानामिकास्वामेककुशपत्रात्मकेपवित्रेधृत्वाकुशोपग्रहः। ऊर्ध्वकेशि विरूपाक्षिमांस
शोणितभोजने। तिष्ठदेवि शिखाबन्धे चामुण्डे ह्यपराजिते। इतिमन्त्रेण शिखां बध्वाचम्य देश
कालौस्मृत्वा मम सर्वपापक्षयपूर्वक श्रीपरमेश्वरप्रीत्यर्थं प्रातःस्नानमहं करिष्ये। तीर्थं तुसा
गरत्वनतिर्थोपदंडहस्तासुरांतक। जगत्स्रष्टुर्जगन्मर्दिन्नमामितां सुरेश्वर। तीर्थाद
[illegible]महाकायकल्पांतदहनोपमं। भैरवायनमस्तुभ्यमनुज्ञांदातुमर्हसि। इतिसंप्रार्थ्य। वरुणाय

125
1415

नम इतिजलं जमाजमते नैवावमर्षनमीक्ष्योमपापं यात्विति जलिं बहिः क्षिप्त्वा मुक्ततीर्थायनमस्कं
जलिं दत्वा मृदमादाय कटि बस्तु रुजंघापादकरान्त्रिर्विलिप्य प्रक्षाल्यैकं जलेपरस्थजेपाद्दस्त्वाच
म्यनम इतिनत्वाचम्य नम इतिनत्वाचम्यविष्णवे नम इतिसर्वांगंमृदालिप्यासूर्याभिमुखो[illegible]दश वा
तिमज्ज्यान्योनमइत्युन्मज्ज्यनिमज्ज्योन्मज्ज्याचम्य तथैवरुद्रायनमः शिराममयेनालिप्यत्वाचम्यकु
शोम्मार्जयेत्। वरुणायनमइत्यष्टवारं परमात्मनेनमः। अग्नये। वायवे। सूर्याय। सवित्रे। यज्ञायन
मइति निमज्ज्यास्मैनमइतिद्वाविंशतिवारं। यद्वाग्नयेनमइतित्रिर्जातवेदसेसवित्रे चिन्तयामिष्टोनमइ
तिसवित्रेनमइतितैः पुनः प्लावयित्वा नमइतित्रिः परमात्मनेनमइतिवाघमर्षणं कृत्वास्नात्वा विष्णवेन
मइतिस्मृत्वाब्रह्मादिदेवास्तर्पयंतां नमइतिवा देवतार्थं त्रिः सव्येनदेवानृषीनीकृष्य दैपायनादि
कृष्णयस्तर्पयंतामितिदेवो वाक्षिरसी। नपमसव्येन सोमपित्र्यमदादीन्नरस्तर्पयंतामितिजलित्रयं त्रिर्द
त्वाधौतेवाससी परिधाय मृदाकरौ प्रक्षाल्याचम्य वरेण पत्राकारमर्द्धचंद्रं वर्तुलं वातिलकंकु

[illegible]

स्मृ.चू.
५२

त्वामुद्दिश्य त्वा ऽर्घ्यं त्वा वा नमो ब्रह्मणे विष्णवे सवित्रे मित्राय वरुणाय रश्मिभ्यो दिग्देवताभ्यो नम इति मंत्रे
कं जले पुष्पांजलिरित्याचार्यचूडामणिः ॥ ततः उदितं सूर्यं रक्तचंदनाक्षतपुष्पैर हृद्ललेमइ जलेन प्र
क्षिप्य जले पुष्पांजलिरित्याचार्यचूडामणिः ततः उदितं सूर्यं रक्तचंदनाक्षतपुष्पजलेनार्चयित्वा हुत
मर्घ्यं नमो विवस्वते ब्रह्मण्ये भास्वते विष्णुतेजसे । नमः सवित्रे शुचये सवित्रे कर्मदायिने इत्यंजलित्र
यं दद्यादिति कल्पतरौ । ततः सूर्यमंडलस्थाय परमात्मने नम इति पुनरर्घ्यं दत्वा ब्रह्मविष्णुरुद्रेभ्यो न
म इति वा विष्णुशिवनामानि वा यथाशक्त्यावर्त्य नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थिति
नाशहेतवे । त्रयीमयाय त्रिगुणात्मधारिणे विरिंचिनारायणशंकरात्मने इति नमस्कुर्यात् ॥ एवं
स्नानं प्रातर्मध्याह्ने च कार्यं । अशक्तो मध्याह्ने गृहे उष्णोदकेन स्नानेप्येवं । आतुरादिना स्नाना
शक्तौ देहमार्जनं तत्स्नानं शिरःस्नानं वा आर्द्रवस्त्रेणांगमार्जनं वा कार्यं । अशिरस्कं स्नानं स्ना
नाशक्तौ तु कर्मिणां । आर्द्रेण वाससा वापि मार्जनं दैहिकं विदुः विद्वत्सरस्वती माघ स्नानं सारस

127/1951

ते विष्णु । विप्रवाक्येन मर्ष्यो । मानसं वा स्नानं कार्यं । यथा ध्यायेद्धरिं सशंखं वासुदेवं चतुर्भुजं शंख
चक्रगदापद्मवनमालाविराजितं तत्पादोदकजां धारां निपतंतीं स्वमूर्द्धनि । चिंतयेद्ब्रह्मरंध्रेण प्र
विशंतीं स्वकां तनुं तया संक्षालयेत्सर्वमंतर्देहगतं मलं । तथा अपवित्रः पवित्रो वा सर्वावस्थां ग
तोपि वा यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिरिति । ततः कांस्यपात्रे आज्ये निजबिंबमवलोक्य ।
आज्यं तेजः समुद्दिष्टमाज्यं पापहरं स्मृतं । आज्यं सुराणामाहारः आज्ये लोकाः प्रतिष्ठिताः । कुंभ
धेनुषु संभूतं सर्वक्रतुषु संस्थितं । देवानामाज्यमाहारमतः शांतिं प्रयच्छ मे इति विप्राय स्वदक्षिणां
दद्यात् । एतद्विष्णुधर्मोत्तरे स्पष्टं । ततो मध्याह्ने पूर्ववत्स्नात्वा ब्रह्मयज्ञं कुर्यात् । तत्र पञ्चलक्षणा
नीतिहासान्पुराणानि विकल्पानीति श्रुतेर्वेदा यद्वा पुराणानि सेतिहासानि वा ज्ञेया । जपयज्ञप्रसिद्ध्य
र्थं विद्यां चाध्यात्मिकीं जपेदिति याज्ञवल्क्योक्तेश्च पुराणन्यायस्यादिपाठविधानेपि शूद्रस्य पारा
शरोक्तेः श्रवणस्यैव कर्मांगत्वात्पुराणश्रवणमेव ब्रह्मयज्ञ इति केचित् । तन्न । नमस्कारेण मंत्रेण

स्नू.प्र० ५३ यंचयज्ञान्नहापयेदिति याज्ञवल्क्योक्तेर्नमस्कारेणतस्यबाधात्। तत्रयोनमसास्वध्वरइतिश्रु
तेर्यज्ञोवैनमइतिहिब्राह्मणंनवतीतिवचनाच्चनमोनमोनमइतिस्मृत्युक्तोमुख्यामुक्तं। तत्रंतु
वेदादीनामर्थबोधेस्वल्पसंस्यवग्रहणान्नमःश्रुतेश्चतदृतत्वेनाप्युपपत्तेर्नमोंतऋग्वेदादिशब्दैःका
र्यमिति। तद्यथा। दर्भासनेउपविश्यपाणिभ्यांपरमेष्ठिरर्षीस्तर्पयंब्रह्मयज्ञंकरिष्येइतिसंकल्प्योप
स्थंकृत्वादर्भाग्रैर्ब्रह्मांजलिंकृत्वानमोनमोनमइतिजपेत्। ओंऋग्वेदायनमः। एवंयजुर्वेदा
यसामवेदायाथर्ववेदायायशिक्षायै। कल्पाय। व्याकरणाय। निरुक्ताय। ज्योतिषाय। छंदो
विचित्यै। अध्यात्मविद्यायै। इतिहासपुराणेभ्यः तर्कविद्यायै। पूर्वमीमांसायै। उत्तरमीमां
सायै नमइतिजपित्वादेवताभ्यःपितृभ्यश्चमहायोगिभ्यएवच। नमःस्वाहायैस्वधायैनित्यमेव
नमोनमइतित्रिर्जपित्वा। इतिविद्यातपोनिरयोनिर्विघ्नसुरौइति। वाग्यतेनार्चितोदेवः प्रीयतां
...नाहमिदंसुकृतोरकंस्पृशेत्। अथतर्पणं। तत्रब्रह्मणेनमइतिनमोंतैर्मंत्रैःकार्यं। तस्मा ५३

129/1951

...दःत्रयोक्तेरितिकेचित्। अन्येतुतर्पणतामिमोंकारपूर्वमितिकात्यायनसूत्रस्यतर्पणतोशास्त्रमन्त्र
गोमानानावान्नंदंतोरिस्माकम्। आसनेदक्षिणंजानुनाच्यऋजुदर्भक्षिणेहस्तदक्षयेनदेवतीर्थेन
र्पयेत्। तत्रमदनपारिजातेयोगयाज्ञवल्क्यकात्यायनसूत्रानुसारेणोक्तं। यथा। ब्रह्मातृप्यतां
विष्णुस्तृप्यतु। रुद्रः प्रजापतिर्देवाःछंदांसिवेदाः ऋषयःपुराणाचार्याःगंधर्वाः इतराचार्याः संव
त्सरःसावयवः देव्यः अप्सरसः देवानुगाः। नागाः सागराः। पर्वताः सरितः मनुष्याःयक्षाःरक्षां
सिपिशाचाःसुपर्णाः भूतानि। पशवः वनस्पतयः ओषधयः भूतग्रामश्चतुर्विधः आचार्यचू
डामणौतुप्रजापत्यंतंदेवायक्षास्तथानागागंधर्वाप्सरसोसुराः। क्रूराः सर्पाः सुपर्णाश्चतरवोजंभ
काःखगाः। विद्याधराजलाधाराह्यपैवाकाशगामिनः। निराहाराश्चयेजीवाःपापधर्मेरता
श्चये। तेषामाप्यायनायैतद्दीयतेसलिलंमयेतिमात्स्योक्तेनतर्पणमुक्तं। अर्थर्षयः निवीतिना
त्वादिगण्यमध्येनप्रजापतितीर्थेनतिलाक्षतमिश्रोदकांजलीमंत्रावस्यादद्यात्। सनकः सनंदनः

स्मृ.र० ५४

सनातनः कपिलः। आसुरिः। वोढुः पंचशिखः। आचार्यचूडामणौ तु मरीचिमत्र्यंगिरसौ पुलस्त्यं पु
लहं क्रतुं ऋषिं सनत्कुमारं च सनंदनमेव चेति नामनिरुक्तं। अथ पितृतर्पणं। दक्षिणामुखः सव्यं
जान्वाच्य प्राचीनावीती पितृतीर्थेन द्विगुणदर्भैस्तिलमिश्रं सलिलमंजलीन् दद्यात्। वसवस्त्वप्य
तां ते त्रयस्त्रिंशत्तिलोदकं। नमः इत्याचार्यचूडामणिः। सोमपाः। हविष्मतः। उष्मपाः। सुकालिनः। बर्हि
षदः। आज्यपाः। यमः धर्मराजः। मृत्युः अन्तकः। वैवस्वतः। कालः सर्वभूतक्षयः। औदुंबरः दध्नः
नीलः। परमेष्ठी। वृकोदरः। चित्रगुप्तः। जीवपितृकोप्येतत् तर्पणं सर्वान् तर्पयेत्। ततः स्वपितृतर्पणे पि
तृभ्यो नमः इत्यावाह्य काश्यपगोत्रः अस्मत्पिता अमुकशर्मा तृप्यतां त्रिः। एवं पितामहः। प्रपितामहः
पितृभ्यो नमः इति षट् त्रिर्मधुवाते न चांजलिं प्रसिंचेत्। अस्मन्माता काश्यपगोत्रा अमुकदेवी तृप्य
तु एवं पितामही प्रपितामही। एपितृभ्यो नमः। आवाह्य। मातामहः प्रमातामहः। वृद्धप्रमाताम
हः। एवं मातामही प्रमातामही। वृद्धप्रमातामही। एवं सर्वान् यस्तुत्रः कन्यापितृभ्यः मातुलः स ५४

13/1451

सा। तत्पत्न्यः पितृष्वसा। मातृष्वसा। स्वभगिनी। सापत्नमातृकेति तिस्रः। श्वशुरः। गुरुः सखा।
मित्रं भृत्यः। यद्वा। आब्रह्मस्तंबपर्यंतं देवर्षिपितृमानवाः। तृप्यंतु पितरः सर्वे मातृमातामहा
दयः। अतीतकुलकोटीनां सप्तद्वीपनिवासिनां। आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदक
मिति। यत्तु मद्दत्तं पारिजाते हारितः। वसित्वा वसनं शुष्कं स्थले विसृज्य बर्हिषि। विधिज्ञ
स्तर्पणं कुर्यान्न तु पात्रे कदाचनेति। तदनुष्ठितोदकस्य च तर्पणपरं उद्धृतेनु स एव। पात्राद्वा
जलमाहाय स्वयं पात्रान्तरे क्षिपेत्। जलपूर्णेथवा गर्ते न स्थले तु विबर्हिषि। योगयाज्ञवल्क्यः
पुष्पहस्तेन सिंचेत्तु तिलानां मिश्रयेज्जले। अतोन्यथा तु सव्येन तिलास्तोह्यविचक्षणे एतच्च
गृहे पुत्रवता न कार्यं। सप्तम्यां रविवारे च गृहे जन्मदिने तथा। भृत्यपुत्रकलत्रार्थी न कुर्यात्तिलत
र्पणमिति मरीचिस्मृतेः। ततः ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः। ते गृह्णन्तु मया दत्तं वस्त्रनिष्पी
डनोदकमिति तीरे पस्थले वस्त्रं पीडयेत्। आचार्यचूडामणौ तु ये बांधवाबांधवा ये जन्मनि बांधवाः ते

श्रू.५०
५५

तृप्तिमखिलां यांतु ये चास्मत्तोयकांक्षिणः। नमो नम इति श्राद्धपीडनमुक्तं। ततः मत्स्येन विष्णुपुराणो
क्तं तर्पयेत्। देवासुरास्तथा नागा यक्षगंधर्वराक्षसाः। पिशाचा गुह्यकाः सिद्धाः कूष्मांडास्तरवः खगाः
जलेचरा भूमिलया वाय्वाधाराश्च जंतवः। तृप्तिमेतेन यांत्वाशु मद्दत्तेनांबुनाखिलाः। नरकेषु समस्तेषु
यातनासु च ये स्थिताः। तेषामाप्यायनायैतद्दीयते सलिलं मया। ये बांधवा बांधवा वा येन्यजन्मनि बांधवाः
ते सर्वे तृप्तिमायांतु मया दत्तेस्तिलोदकैरिति। मत्स्ये तु। आब्रह्मस्तंबपर्यंतं जगत्तृप्यतु। इत्येकांजलि
मतो ब्रह्मणे नमः। विष्णवे। रुद्राय। सवित्रे। मित्राय। वरुणाय नम इति जले पुष्पं दत्त्वा पुनः ब्र
ह्मणे नमः। अग्नये। पृथिव्यै। ओषधिभ्यः। वाचे। वाचस्पतये। विष्णवे। महद्भ्यः। अद्भ्यः। अपांपतये।
वरुणाय नम इति तर्पणं कृत्वा मुखं संमृज्य देवेभ्यो नम इति विसर्जयेत्।। इति कमलाकरभट्ट
कृते शूद्रधर्मे शूद्रस्य स्नानतर्पणादि। अथ देवपूजा। सा च बिंबे स्थिरादिजीर्णलिंगार्चास्थापित
पार्थिवलिंगादौ समंत्रसहिता कार्या। ब्राह्मणस्थापितस्फटिकद्विजस्थापितलिंगार्चादौ तु स्पर्शरहिता

दूरतः कार्या। स्वयंप्रतिष्ठिते लिंगे मंत्रविक्रियया विधि। तदाप्तन्न तिस्त्रः शूद्रस्यापि योषिदपि न संस्पृशेदिति
नारदीयात्। एतच्च माधवोक्तं। सा च नाम्ना कार्या। एवं स्त्रियापि। विष्णोस्तु पूजनं कार्यं प्रतिबुध्यानं चा
न्यथेति मदनपारिजाते विधवाधर्मे स्कांदोक्तेः। तत्रैव पाद्मे। आदित्यगणनाथं च देवीं रुद्रं च यथाक्रमं।।
नारायणं विशुद्धाख्यमंते च कुलदेवतां। निगमः। ब्रह्माणं विष्णुं वा सूर्यमग्निं गणाधिपं। दुर्गां सरस्वतीं ल
क्ष्मीं गौरीं चाभिसेवेत। मत्स्यमनुः। जपस्तपस्तीर्थसेवा प्रव्रज्या मंत्रसाधनं देवताराधनं चैव स्त्रीशूद्रपत
नानि षडिति। तद्विहितेन्वयपरं मात्स्ये सौवर्णी राजती वापि ताम्री रत्नमयी तथा शैली दारुमयी वापि
लोहसंघमयी तथा लोहसंघः पंचधातुरसाः रीतिका धातुयुक्ता वा ताम्रकांस्यमयी तथा शुभदा
रुमयी वापि देवार्चा प्रशस्यते। अंगुष्ठपर्वादारभ्य वितस्तिर्यावदेव तु। गृहेषु प्रतिमा कार्या नाधिका
शस्यते बुधैः। भागवते। वैदिकस्तांत्रिको मिश्र इति त्रिविधो मखः। शिवार्चने। चंद्रिकायां पाद्मे। वैदिको
मिश्रितो वापि विप्रादीनां विधीयते। तांत्रिको विप्र नक्तस्य शूद्रस्यापि प्रकीर्तितः। तत्रोपचाराः अनेकवि

133/1951

शू.५०
५६

धारणवमनेदैः परद्यादिर्ज्ञेउक्ता। आचारचिंतामणौ। सपर्यात्रिविधाः प्रोक्तास्तामसिकाममाश्रयेत्
गंधादिकानिवेद्यांता पूजा पंचोपचारका। दशोपचाराः। अर्घपाद्यमाचमनं मधुपर्कस्नानानि च
गंधादि च कं चेति उपचारा दशोदिताः। अथ षोडशोपचाराः। आसनं स्वागतं चार्घः पाद्यमाचमनं तथा
।। अथाष्टादशोपचाराः। आसनावाहने चार्घ्यपाद्यमाचमनं तथा। स्नानं वस्त्रोपवीतं च भूषणा
नि च सर्वशः। गंधपुष्पे तथा धूपदीपं नैवेद्यमेव च। माल्यानुलेपने चैव नमस्कारविसर्जने।।
अथ षड्त्रिंशोपचाराः। आसनाभ्यंजने तद्वदुद्वर्तनविरूक्षणे। सन्मार्जनं सर्पिरादिस्नापनं वा
हनं ततः। पाद्यार्घ्याचमनीयं च स्नानीयं मधुपर्ककौ। पुनराचमनीयं च वस्त्रं यज्ञोपवीतकं। अलंका
रो गंध पुष्पे धूपदीपौ तथैव च। तांबूलानि च नैवेद्यं पुष्पमाला लेपैव च। अनुलेपनं च शय्या
चामरव्यजनं तथा। आदर्शदर्शनं चैव नमस्कारो थ नर्तनं। गीतवाद्ये च दानानि स्तुतिहोमप्रद
क्षिणं। दंतकाष्ठप्रदानं च ततो देवविसर्जनं। उपचारा इमे ज्ञेयाः षड्त्रिंशास्तु रपूजने। अन्ये च तु षष्ठु

135/1951

पचाराः। ते च काम्यपूजायां। एते विकल्पाय यथाविभवं। पूजा च देवतार्चनं कार्या। मार्जनार्चनबलि
कर्मभोजनानि देवतार्थे नेति हारीतोक्तेः। ब्राह्मे ब्रह्मा गलयं विप्रे मोवैव अर्वं च प्रदीयते। रुद्रागलग्न
मग्नो तु दहेत्सर्वं च तत्क्षणात्। शिष्टेभ्यस्तु यदेवेभ्यो हन्तेरीनेषु निक्षिपेत्। मरनपारिजाते गारुडे धा
त्रीफलेन येत्सु एवं जपेत्या। समुपोषणे। स्वर्गे च सल्लभेन्मर्त्यस्तुलसीपूजमेन तत्। नरसिंहपुराणे ना
गपुष्पं बिल्वपत्रं चंपकं तगरं तथा। करवीरं तथा श्वेतं पाटलाशोकपुष्पकं। वनमालाप्यशोकं च
सेवंतीकुब्जमालती। त्रिसंध्यं च तथा श्वेतं कुंदं च शतपत्रकं। मल्लिका चैव जाती च सर्वपुष्पाधि
शिष्यते। पत्राण्यपि तत्रैव। अपामार्गं भृंगराजं शमीपत्रं च खादिरं। दूर्वा च कुशपत्रं च दमनं म
रुवकं तथा। ततः श्रेष्ठं बिल्वपत्रं ततश्च तुलसी वरा। पल्लवान्यपि चैषां तु। शास्तानवाविधौ हरेः
अगस्तिरक्षसं भूतौ। कुसुमैरसितैः सितैः। ये चान्यपि षड्पतिरेवशांतैः मासं वै स्थवं परं। तथा तुलसी
मालया विष्णुः केतक्या वापि पूजितः। समाः सहस्रं सुप्रीतो भवते मधुसूदनः। शिवे च जपी नितत्रैव।।

मू.रु.
५७

जपाबंधूकसिंदूरं गयात्रैसंधिके द्युमे। नरंतीकेतकीयूथीमालतीकुटजानि वा। धुस्तूरं च कुमारं च भ्र
मरेणापि नार्पयेत्। बर्बरीमंजरीपत्राणि तथा चकुमुदादयः। विष्णुरहस्ये। जलेपर्युषितं त्याज्यं पत्राणि
कुसुमानि च। तुलस्यगस्त्यबिल्वानि गंगावारि न दुष्यति। विशेषस्तु मत्कृते निर्णयसिंधौ पूर्वं क्रमसाक
रे च ज्ञेयः। अथ तीर्थमहिमा। स्कांदे। शालग्रामोद्भवो देवो देवी द्वारवती भवा। उभयोः स्नानतो यत्र
स्कंदत्या निवर्तते हेमाद्रौ लक्षणकांडे स्कांदे। शिलाग्राह्यं चंदनं पत्रं नैवेद्यं सुमनांतजं। शालग्रामशिलासंग
तीर्थकोटिशताधिकं। पाद्मे स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः। गंगागोदावरीरेवा नद्यो मुक्ति
दास्तु याः। तावसंति हरस्वेच्छ शालग्रामशिलाजले। गौतमीवरीयसंवादे येषां धौतानि ग्रामाणि हरेः पादो
दकेन वै। अंबरीष गृहते षां दासोहं चरणे सदा। हरेः स्नानावशेषं तु जलं यस्योदरे स्थिते। अंबरीष प्रण
म्याघैः पादपांशुः प्रगृह्यतां। गर्जति तावदस्मानि तीर्थानि भुवनत्रये यावन्न प्राप्यते तीर्थं शालग्रामाभिषे
चनं। जन्मप्रभृति पापानां प्रायश्चित्तं यदीच्छसि शालग्रामशिलावारि पापहारि निषेव्यतां। नृसिंहपुराणे

137
1951

गंगाप्रयागगयपुष्करनैमिषाणि पुण्यानि यानि कुरुजांगलयामुनानि। कालेन तीर्थसलिलानि पुनंति पा
पं पादोदकं भगवतस्तु पुनाति सद्यः। ब्रह्मचारी सव्रती च वानप्रस्थी च सन्यासी शुचिः। विष्णुपादोदकं यस्य
मुखे शिरसि विग्रहे। स्मृत्यंतरे। देहः शुध्यति चाप्यात्मा पीत्वा पादोदकं हरेः। नित्ये नैमित्तिके काम्ये पी
त्वा भुक्त्वा न दुष्यति। व्रतादौ विष्णुपादोदकं पीत्वानंतरं भुक्त्वा न दुष्यति हस्तेति पाद्मे नित्ये काम्ये च एका
दश्यां व्रतादौ नैमित्तिके सांवत्सरिके श्राद्धे पादोदकं पीत्वा तत्कर्महत्वान दुष्यतीत्यर्थः। ननु जलस्या
पि नरश्रेष्ठ प्राशनात्क्षयजायते। नित्यक्रियानिवर्तेत काम्ये नैमित्तिके। सहेति कालिकापुराणात्।।
अभुक्ते भुक्तवते यस्मिन्निषेधात् कथं कर्मार्हत इति चेन्न सामान्यस्य विशेषेण बाधात्। रागप्राप्त
निषेधाच्च। तच्च पूजांते पेयं तदंगत्वात्। ये तु उपवासदिने प्राक् कर्मणः अन्नं पिबंति ते भ्रांताः।
अशितानशिता ह्यापो जन्मनेवहि पारयेदिति दर्शनाच्चेति विष्णुवाजपेयिनः। गारुडपुराणे
जलं न येषां तुलसीविमिश्रं पादोदकं चक्रशिलासमुद्भवं। नित्यं त्रिसंध्यं बुधनेन गात्रे स्वर्गं कुतो धि

स्मृ०कौ०
५८

र्मबहिःकृतानराः। आह्निकप्रदीपे मृतके सूतके वापि आशौचे नैव विद्यते तेषां पादोदकं मूर्ध्नि
प्राशनं ये च कुर्वते। अंतकालेपि यस्येह दीयते पादयोर्जलं। सोपि सद्गतिमाप्नोति पापाचारो ब
हिष्कृतः। भुक्त्वापीत्वा विशुद्धः स्यात्पीत्वा पादोदकं हरेः। स्कांदे त्रिविक्रमवचनं। दृष्टिपूतं तु पत्रोयं वि
ष्णुनाप्रत्तविष्णुना। तद्वै पापहरं पुत्र किं पुनः पादयोर्जलं। विष्णुरहस्ये। विष्णुपादोदकं पीत्वा य
स्तु रक्षति शंकया। यस्याचमति संमोह्य ब्रह्महत्या सविंशति। गारुडे। पादोदकं पिबेन्नित्यं नै
वेद्यं भक्षयेद्धरेः। शेषं च मस्तके धार्यमिति वेदानुशासनं। शालग्रामशिलातोयमपीत्वा यस्तु
मस्तके। प्रक्षेपणं प्रकुर्वीत ब्रह्महा स निगद्यते। शालग्रामशिलातोयं पिबेद्यो मकरेण तु
वै। [illegible] प्रोक्तं स्नानादिकं समाचरेत्। विष्णोः पादोदकं पीत्वा कोटिजन्माघनाशनं त
देवाष्टगुणं पापं भूमौ बिंदुनिपातनात्। भक्तिचेन्नारदीये। आयसे च तथा कांस्ये काष्ठे वालाबुके तथा
। उद्धृत्य पादसलिलं मद्यतुल्यं विनिर्दिशेत्। श्रीविष्णोः पादसलिलं करेण त्वा मुखे क्षिपेत् अद ५८

139
1951

त्वा पिबते तोयं रौरवे नरके वसेत्। अरत्नाविष्णुकेनाद्रिमस इति तीर्थग्रहणमंत्रो हलायुधे। अ
कालमृत्युहरणं सर्वव्याधिनिवारणं। विष्णोः पादोदकं पीत्वा शिरसा धारयाम्यहमिति हेमाद्रौ को मा
धवीये च स्कांदे। एकादश्यामुपोष्याथ यो श्नाति द्वादशीदिने। नैवेद्यं तुलसीमिश्रं हत्याकोटिवि
नाशनं। यत्तु श्रीदत्तीये। आचारादर्शे सात्वतेप्यस्तु तद्देयं विष्णवे यन्निवेदितमिति व्यासस्मवि
ष्याशि। तदन्येन निवेदितविषयं। अनिवेद्यं न भोक्तव्यं विष्णवे यत्तु कदाचनेति हरत्नारदी
ये। नत्तद्दृश्ये न निवेद्यं वमोक्तव्यमित्यपरार्कप्रत्यपेनामिषुत्सरुत्वान्नलक्ष्यं यंतीति वन्हिवेदन
समानकेदंकेन लक्षणीक्ते। पुराणनिवेदिते सत्वाभावाद्देवद्रव्यं गुरुद्रव्यं यत्नेन परिवर्जयेदि
ति निषेधात्सद्व्याद्देवलकं चैव सर्वा भांजलमा विशेषादिति निषेधान्न स्थ्नां पुष्पंदिवाकीर्तिं देव
द्रव्योपजीविनं मृत्वासाजलमाक्रियघ्यते प्राश्यविष्णुध्यंतु इति स्मृतेश्च। विष्णोः षीमत्कृते आचा
रादीपेज्ञेयः। अन्यभूद्रव्यं विष्णवे दीवः। शंखः। पंचयज्ञविधानं तु गृहीनिस्संनद्वापयेत् ममः

स्मृ.कौ.
५९

ब्रह्मयज्ञो देवयज्ञः पितृयज्ञस्तथैव च । भूतयज्ञो नृयज्ञश्च पंचयज्ञाः प्रकीर्तिताः । स च लौकिकेग्नौ
कार्यः । अत एव तत्र तत्रैव स्थपतीहि लौकिके इत्युक्तं । ये तु लौकिकाग्न्यभावे पि गृहस्थस्य तु मन्वतीमाहु
स्तिमन्त्रा एव । विज्ञानेश्वरापरार्कमेधातिथयो प्येवमाहुः । गृह्याग्नौ तु पचेदन्नं लौकिके वापि नित्य
शः । यस्मिन्नग्नौ पचेदन्नं तस्मिन् होमो विधीयते इति मनूक्तेः । असंभवे शातातपः लौकिके वै
दिके वापि हुतोच्छिष्टे जले क्षितौ । वैश्वदेवस्तु कर्तव्यः पंचसूनापनुत्तये । स च पक्वेनापि कार्यः । स्थ
पती । एवं तु अन्नपानत्राप्यामस्याहितिकेचित् । पक्वमुच्छिष्टमुच्यते इत्युक्तेः स्वाकर्षकत्वमेने
वेति स्मार्तगौडाः । तत्र वैश्वदेवे मन्त्राद्येनेनानाप्रकारा उक्ताः । तेषु मनूक्तो निरग्निद्विजपरः ।
तस्य कात्यायनोक्तेः गृह्याग्निं विना नाधिकार इति स्मृतिकौमुदीकारः । तत्र निरग्नेः शाकल
मंत्रैर्होमा इत्युक्ते । तदाह मदनपारिजाते वसिष्ठः । अनग्निः कस्तु यातिमसोत्रेणाहुतिभिः स्व
यं हुत्वा शाकलमंत्रैस्तु शेषान्भूतबलिं हरेत् । शाकलमंत्राः देवकृतस्येनस इति षट् । भूतस्यापि ५९

141
195

प्रागुक्ते रीत्या कात्यायनकर्माङ्गे तु वैश्वदेवान्नाद्धोमः । न तु मनूक्तः । स्मृतस्यास्मृतिश्रवणाभावेन तत्कर्मण्यन
धिकारात् तदुक्तो वैश्वदेवस्तैः कार्यः । यथा मार्कंडेयपुराणे ततः संपूजयेद्वह्निं दद्याद्वै वाहुतीः क्र
मात् । प्रथमां ब्रह्मणे दद्यात् प्रजानां पतये ततः । तृतीयां चैव गृह्याभ्यः कश्यपाय तथापरां । ततो
नुमतये दद्याद्दद्याद्गृहबलिं ततः । पर्जन्यायाद्भ्यो धरित्र्यै दद्यान्मणिके त्रयं वायवे प्रतिदिश
प्रतिदिशं प्राच्यादितः क्रमात् । ब्रह्मणे चान्तरिक्षाय सूर्याय च यथाक्रमं । विश्वेभ्यश्चैव देवेभ्यो विश्व
भूतेभ्य एव च । उषसे भूतपतये दद्याद्वोत्तरतस्ततः । स्वधा नम इत्युक्त्वा पितृभ्यश्चापि दक्षिणे । कृ
त्वापसव्यं पश्चात्मै तन्त्रेव नेजनं । ततस्तोयमुपादाय तेषां वा नाक्षिपेद्भुवीति । विष्णुपुराणे प्येवं होम
मुक्त्वा बलीन्विशेषतउक्तः । तच्छेषमणिके पृथ्वी पर्जन्यायाम्बुधः क्षिपेत्ततः । द्वारे धातुर्विधातुश्च मध्ये च ब्र
ह्मणः क्षिपेत् । इन्द्राय धर्मराजाय वरुणाय तथेन्दवे । प्राच्यादिषु बुधो दद्याद्धुतशेषात्मकं बलिं । प्रागु
त्तरे च दिग्भागे धन्वन्तरिबलिं विदुः । वायव्ये वायवे दिक्षु समस्तासु ततो दिशां । ब्रह्मणे चान्तरिक्षाय

स्मृ.दं.
६०

मानवे चक्षिपेद्बलिं। विश्वेदेवान्विश्वन्तां स्ततो विश्वपतीन्पितॄन्। पक्ष्मारांच समुद्दिश्य बलिहृत्वा
न्तरेश्वर कानीयसत्रेपी दमेव बलिं हरणं किं चिन्मुने तेनभूतेपीदमेव। नत्वस्वाहाकारेण नमस्कारेण
त्रैः श्रूतो विधीयते इति नारदोक्तेर्होमे स्वाहा श्राद्धे बलौ नमश्चाद्यः इति स्मृतिकौमुद्यां तत्र नमस्कार
णमंत्रेणोस्येतद्विरोधात् तत्र बलिदानं गृहदेशेषु कार्यं अग्नेः पश्चाद्वा। अथ प्रयोगः। दर्भहस्तः
स्वाचम्य तत्कालीनपाणिनायमवाद्देशकालौ स्मृत्वा पंचसूनापनुत्तये परमेश्वरप्रीत्यर्थं वैश्वदेवं क
रिष्ये इति संकल्प्य कुंडे हस्तस्थंडिले वा संमृज्योपलिप्योल्लिख्याभ्युक्ष्य नाभिकाम्यामहमुद्धृतासु
म्रेणौ किंकाग्निं संस्थाप्य पावकाग्नये नमः। मुखं यः सर्वदेवानां हव्यभुक्कव्यभुक्तथा। पितॄणां च न
मस्तस्मै विष्णवे पावकात्मने इति संपूज्य पर्युक्ष्याग्रहान्नेन तंडुलैराज्यप्लुतैः फलैर्वाकौर्वा कु
र्यात्। तद्द्रव्यमग्नौ निधाय वामाभ्युक्ष्य हस्तेन घृतप्लुतं जुहुयात्। आहुतिपरिमाणं पर्वपरिका
उक्षितकमात्रा वा। यथा। अग्नये नमः। इदमग्नये न ममेति त्यागः। एवमग्रेपि। वायवे सूर्याय ६०

143/1951

वमग्रेपि। वायवे सूर्याय प्रजापतये। अग्नये स्विष्टकृते। इति शाकल्यहोमः। अथ पौराणः। ब्रह्मणे प्र
जापतये। गृह्याभ्यः कश्यपाय। अनुमतये। विश्वेभ्यो देवेभ्यः। अग्नये स्विष्टकृते इति। ततः पर्युक्ष्य
विभूतिं धृत्वा नमस्कुर्यात्। विज्ञानेश्वरमते देवताभ्यः पितृभ्य एव च नमः स्वाहायै स्वधायै नित्यमेव न
मो नम इत्येतेन सह होमः। नम इत्येव मंत्रेण होम इत्येके। मदनपारिजाते परिशिष्टे शाकं वा यदि
वा पत्रं मूलं वा यदि वा फलं संकल्पयेद्यदाहारं तेनाग्नौ जुहुयादपि। व्यासः। जुहुयात्सर्पिषाभ्य
क्तं तैलक्षारविवर्जितं। दध्यक्तं पयसाभ्यक्तं तदभावेंभसापि वा। चतुर्विंशतिमते। अलाभे
येन केनापि फलशाकोदकादिभिः। पयोदधिघृतैः कुर्याद्वैश्वदेवं स्रुवेण तु हस्तेनाग्न्यादिभिः कु
र्याद्भिरंजलिनाजले इति देवयज्ञः। अथ भूतयज्ञः। मध्ये पर्जन्याय। अद्भ्यः। पृथिव्यै। द्वारश्री
ख्योः धात्रे नमः। इदं धात्रे। एवमग्रेपि। विधात्रे नमः। प्रतिदिशं वायवे। प्रतिदिशं दिग्भ्यः। इंद्राय धर्म
राजाय वरुणाय इंदवे। ईशान्यां धन्वंतरये वायवे ब्रह्मणे अंतरिक्षाय सूर्याय। उत्तरे विश्वेभ्यो।

श्रा०कृ०
६१

देवेभ्यो नमः ॥ विश्वेभ्यो नक्तानां पतये नमः ॥ ताः ॥ इमा१ ८ ॥ धन्वंतरये १ प्राच्यै दिशे ॥ ५ ॥
क्षिणे प्राचीनावीती पितृभ्यः स्वधा नमः ॥ इदं पितृभ्यः ज ॥ विधात्रे ॥ ६ ॥ वायवे ॥ १३ ॥ उदीच्यै ॥
लस्य स्पर्शः अपंक्तीयः पक्षः पौराणस्तु ॥ स्वधा प्रोन्नेत्य स्पो ॥ २२ सूर्याय ॥ १० ॥ इंद्राय ॥ ४ ॥
के ॥ यात्रप्रक्षाल्य वायमेय स्वेनेत्रे इति निनयेत् ॥ इंद्राय ॥ २७ ॥ विश्वपतये ॥ ४९ ॥ ॥ ॥
ह्मणे ॥ अथवा देवताभ्यः पितृभ्यश्चेत्यनेनैव वक्ष्ये सह अंतरिक्षाय ॥ ५ ॥ धात्रे ॥ १७ ॥
हुत्वानेनैव पितृयज्ञ इत्येके ॥ आचार्यचूडामणौ तु नुं ॥ इंद्र० २६ ॥ प्रजापतये ॥ २१ ॥ ब्रह्मणे ॥
॥ हेति विश्लेणोक्तेन नमो नम इति सव्यं जुहुयात् ॥ एवं ॥ दक्षिणाः ॥ १८ ॥ वायवे ॥ २ ॥ विश्वेभ्यो देवे
समस्ताः समस्ताश्च ॥ ततो देवहुत स्वेन सीवे यजनु ॥ अपराश्चिमे ॥ ७ ॥ वायवे ॥ २४ ॥ यक्ष्मणे ॥
हेति विश्लेणोक्तेन नमो नम इति सव्यं होमः ॥ तत्र ॥ ३३ ॥ विश्वेभ्यो देवे ॥ २ ॥ ... ॥ १५ ॥ धर्मरा०
रेणवैदिकवाधात् अन्यद्वा एवं वषट् ॥ ततो ॥ १२ ॥ प्रतीच्यै ॥ ९ ॥ पर्जन्याय ॥ स्वधाभि०
यस्वि हुते च ॥ नमो विश्वेभ्यो देवेभ्यः ॥ सर्वेभ्यो नक्ते ॥ ८ ॥ वायवे ॥ ... ॥ १६ ॥ वरुणाय ॥ ६१

145/1951

चंडालादिभ्यो वायसेभ्यश्च
भ्यो नमः ॥ नमः पितृभ्यो नम इति दक्षिणे ॥ ऐशान्येय स्मे ... पौराणे रेकः ॥ ... शेषमादाय गृहं गणोभ्यो ... सौम्या नोत्रपाम श्वबलि
दक्षिणे धर्मराज ॥ चित्रगुप्ताभ्यां ... इत्युक्तं ॥ ततः ... वेतावहिंसकौ ॥ श्वा स्वानम इति दत्वा पुनराह
॥ वैवस्वतकुले जातौ ॥ ताभ्यां पिंडं प्रदास्यामि ... ॥ वायसाः प्रतिगृह्णंतु ... पिंडं ... पिते ... का
य ऐंद्रवारुणवायव्याः सौम्या वै नैर्ऋतास्तथा ॥ वायसाः ... विष्णुपुराणोक्ते मंत्रैर्बलीन्नरद्यात् ॥ ... देवा
बलिं दत्वा ... इत्युक्त्वा पुनराह ... विष्णुपुराणे ... पिशाचास्तरवः समस्ता ये चान्ये
मनुष्याः पशवो वयांसि सिद्धाः सयक्षोरगदैत्यसंघाः ॥ प्रेताः पिशाचास्तरवः ... कर्मनिबद्धबद्धाः
भिवंति मयाप्रदत्तं ... ॥ पिपीलिकाः कीटपतंगकाद्या बुभुक्षिताः कर्म ... ॥ येषां न माता न पि
प्रयांतु ते तृप्तिमिदं मयान्नं ते सो ... सुखिनो भवंतु ... पिपीलिकादिभ्यः ॥ येषां ... मुदिता भवंतु ॥ इ
तानबंधुर्नैवान्नसिद्धिर्न तथान्नमस्ति ॥ तत्र ... ते यांतु तृप्तिं मुदिता भवंतु ॥ ... तस्मात् ... तानि
दत्तमनायबंधुभ्यः ॥ भूतानि सर्वाणि तथान्नमेतदहं च विष्णुर्न यतो ... ॥

कायस्ततमन्त्रेमयच्छामिनवायतेषां। इदं नतेभ्यः। चतुर्दशोमस्तगणोयएवत अस्थितोयेखिलस्त
तसंघाः॥ तृप्त्यर्थमन्त्रेणमयाविसृष्टं तेषामिदं तेमुदिताभवंतु। इदं नतगणाहिभ्यः इत्युच्चार्यन
रोदद्यात्त्रिः श्रद्धासमन्वितः। सुविस्ततोपकाराय गच्छेत्सर्वाश्रयोयतः। श्वचंडालविहंगानां सुवि
दद्यात्ततोनरः॥ येचान्येपतिताः केचिदपुत्राःपुत्रिमानवाः। सतोगोदोहमात्रंचै कालं तिष्ठे
तेगृहांगणेइति। ततः हस्त्यादिपतितपापरोगिश्वपचादिभ्यो दद्यात्। तिनागदेवाग्नि
केदारेहरिनाथ्येच तदेतद्देवसूरेर्वद्विजानां यद्यपिसायंप्रातःकृतं तथापिश्राद्धगणादिचैवन
तुसाये। पञ्चयज्ञमात्रोक्तेः वैश्वदेवविधानावात् तदाहमूढनपारिजातेजमदग्निः वैश्वदे
वतयाश्राद्धे कुर्याद्बलिहर्तितया। मरुतः पंचयज्ञान्स्तुर्दिवे वेतालहधर्मवित् तेनरात्रौवेश्व
देवपुत्रयज्ञोपिनात्र नान्नश्राद्धे सेतिसंक्षेपः। अथनित्यश्राद्धं तनस्यवक्कुकार्यतवा श्राद्धंवाप्रियमः
मातृस्त्रीबलिरथापिवेतिच्छंदोगपरिशिष्टात्। मनुः। एकमप्याशयेद्विप्रंपणामप्यन्वहंगृही

147
1951

प्रचेताः। नामंत्रणं न होमश्च नावाहनविसर्जने। नपिंडदानं नसुरा नित्ये कुर्याद्द्विजोत्तमः
॥व्यासः। नावाहनं स्वधाकारः पिंडाग्नौकरणादिकं। ब्रह्मचर्यादिनियमो विश्वेदेवास्तथैव
च। नित्यश्राद्धे पुरुषजेयं दक्षिणापिंडवर्जितं। दक्षिणायां विकल्पः। किंचिद्दत्वा विसर्जयेदिति
प्रचेतसोक्तेः। अथप्रयोगः॥ आचम्य देशकालौ संस्मृत्य नित्यश्राद्धं करिष्ये। अमुकगोत्रास्मत्पि
तृपितामहप्रपितामहानां काश्यपगोत्राणाममुकशर्मणां। एवं मातामहप्रमातामहवृद्ध
प्रमातामहानां सपत्नीकानां स्थाने क्षणः क्रियतामिति क्षणं दत्वा पितरः सोमस्तेन मातामहाश्च इ
दंवः पाद्यमिति पाद्यं दत्वाचम्योद्धनुरेवं कुशासने उपविश्य पितरो मातामहाश्च एष वो गंधः
इमानि पुष्पाणि। धूपो दीपश्चाच्छादनं चेति दत्वा पूर्णतां वाच्य पित्रादिगुणं मातामहानुकल्प
प्रोक्ष्य पात्रं माल्यसतिलान्विकामं च अङ्गुष्ठं दत्वा पितरो मातामहाश्च इदं वः श्रा
मान्नं त्रिगुणं द्विगुणं वा सोपस्करं येयंनःश्राद्धधरो विप्रः अक्षय्यरूपमिदं पितृभ्यः काश्यप

स्मृ.च.
६३

प गोत्रेभ्यो मुकशर्मभ्यो वसुरुद्रादित्यस्वरूपेभ्यस्तथा मातामहादिभ्यश्चेदमन्नं स्वधा संपद्यतां न
मः दत्तमक्षय्यमस्तु प्रसादार्पणमस्तु मधु स्वदतुम्का सुप्रोक्षितमस्तु शिवा आपः सौमनस्य अक्ष
तं दीर्घमायुः पितरः स्वस्तीति ब्रूत पितृणां पदस्थं सदक्षय्यमस्तु दक्षिणां दद्यात् स्वधा ॥ एतावत्
शक्तौ पित्र्यबलिनैवेति संक्षेपश्राद्धसिद्धिः ॥ इति नित्यश्राद्धं ॥ अथ मनुष्ययज्ञः ॥ हारीतः सर्वो
ऽप्यदृष्टवता गृहेणानागच्छंतिपरस्पैव ब्राह्मणो विद्वानाद्दरमस्मेतितमभ्युपतिष्ठमानदेवतां आ
प्नवंति ॥ बृहस्पतिः प्रीयंते सांगते नाग्निरासनेन शयनेन च ॥ पितरः पादशौचेन भोजनेन प्र
जापतिः ॥ याज्ञवल्क्यः ॥ आम्नानी नोतिथिर्ज्ञेयः श्रोत्रियो वेदपारगः ॥ मान्यावेतौ गृहस्थस्य
ब्रह्मलोकमभीप्सतः ॥ अतिथिं श्रोत्रियं तृप्तमासीमांतमनुव्रजेत् ॥ यमः ॥ नश्छेदोच्चेचुरणं
देशोनाम कुल्य श्रुतं ऽत्र ध्वनो मागतं विप्रं भोजनार्थमुपस्थितं ॥ विष्णुपुराणे ॥ दिवातिथौ तु वि
मुखे गते यत्पातकं नृप तदेवाष्टगुणं पुंसः सूर्योढे विमुखे गते ॥ स्वयंस्रस्तु सर्वे ॥ ततोऽतिथिं

149
1951

प्रतीक्ष्य पार्श्वे भक्षादात्मम पर्ज्या मान्नं निवेद्य श्वभ्यो विद्धि श्वपच वायसेन काकादिमनुष्येभ्यो हंतनम
मे स्तु इत्यादि दद्यात् ॥ इदं नित्यश्राद्धात्मागिति हरिहरः ॥ विष्णुपुराणे ॥ दशेवाय द्विवादे ष्यो मूर्द्ध
पंडित एव वा ॥ संप्राप्तो वैश्वदेवांते सोतिथिः स्वर्गसंक्रमः ॥ ततो गोग्रासः ॥ मदनपारिजाते कृ
ष्यशृंगः ॥ गवां ग्रासं च कुर्वीत नित्यमेव समाहितः ॥ गवां कंडूयनं स्नानं ग्रासमाह्निकमेव च
॥ मंत्रस्तु ॥ सौरभेयाः सर्वहिताः पवित्राः पापनाशनाः ॥ प्रतिगृह्णंतु मे ग्रासं गावस्त्रैलोक्य
मातरः ॥ सुरभि त्वं जगन्माता देवि विष्णुपदे स्थिता ॥ ग्रासं गृहाण मद्दत्तं गोमातस्त्रातुमर्हसीति
॥ श्रीदत्तीयेपि विष्णु वरणोदकेन संयुक्तं प्रदद्याद्गवाह्निकं ॥ कपिलाशतदानस्य फलं तेवि
द्यान्नसंशयः ॥ गवाह्निकमहोरात्रपर्याप्तं गोभक्ष्यं ॥ मंत्रस्तु पंचभूते तेन्नेशिवे पुण्ये पवित्रे स
र्वसंभवे ॥ प्रतीच्छेमं मया दत्तं सौरभेयि नमोस्तु ते ॥ अथ भोजनं वाजपेय गार्हिण्यातुरस्य
लिखांधवादीनसंभोज्य याणि पादं प्रक्षाल्य द्विराचम्य ॥ अश्वो देशोरहस्तिचतुरस्रं त्रिकोणं

स्मृ.कौ.
६४

च वर्तुलं वार्धचंद्रकं कर्त्तव्यमानुपूर्व्येण ब्राह्मणादिषु मंडलमिति व्यासोक्तमर्द्धचंद्रं ॥ स्मृत्या
सुखं णं मतमिति शंखोक्तमसुखं णं वा हत्वा ॥ पंचाशत्पलिकं कांस्यपात्रं धिकं भोजनाय वै
॥ सहस्थेत्तु सदा कार्यं मन्नावेदे मरूप्ययोरिति ॥ हेमाद्रौ वृत्रिपोक्तं कांस्यादिपात्रे परिवित्रि
ष्ट मन्नं प्राङ्मुखो यमि होमो नीघृताक्तं प्रोक्ष्य ॥ धर्मराजाय नमः चित्राय नमः चित्रगुप्ताय
नमः प्रेतेभ्यो नमः इति बलिं दक्षिणतो दत्वा जलं हृत्वा जलं प्रात्रपदेवता [illegible] मासुष्टेनत्व।
हंसी नमः इत्येवं वा पंचग्रासा यान्नं प्राणत्रय या सुखं भुंजीयात। आदिपुराणे। नोच्छिष्टो ग्राहये
दाज्यं जग्ध्वा शिष्टं न संसृजेत्। पुनरत्रं भोजनं तु अनिःशेषं कुर्यात्। प्राज्ञः कथंचन अ
मत्र दधः क्षीरज्य क्षौद्रसक्तुभ्य एव च। इदं मनुः। नैकः स्तेन च जलं स्नेहेनाव कीर्तितम्विदुरि
मादि द्विजवर्ज्जं ज्ञेयं देवलः। भुक्तोच्छिष्टं समादाय सर्वस्मात्किंचिदाचमन्नमुच्छिष्टभागधेये
भ्यः सोदकं निर्दपेत् भुवि। भोजनान्ते पुनर्जलं प्राणत्रयपेशोषमिंचेत्। मंत्रस्तु। रौरवे पुण्यपन्निलयेपद्मा

सुदनिवासिनां। अर्थिनामुदकं निसमक्षय्यमुदकं निसमक्षय्यमुपतिष्ठतु। ततो मुखं पाणि
पादं प्रक्षाल्याद्भिराचम्य जानुनी स्पृष्ट्वा पुनराचमेत्। अगस्तिरग्निर्वडवानलश्च भुक्तं मयान्नं जरय
त्वशेषं। सुखं ममैतत्परिणाम संभवं। यच्छत्वरोगी मम चास्तु देहः। अगस्तिं कुंभकर्णं च शनिं च व
डवानलं। आहार परिणामार्थं स्मरामि च वृकोदरमिति अद्यरं संस्मरेत्पाणीं बूलं प्रात्रपुराणम्
वर्णादिनोद्दः शेषं नपेत्। ततो रात्रौ रविपर्वसंक्रमव्यतीपातवैधृतिश्राद्धस्वरूर्वादिनभिन्नरात्रौ द्वि
तीयवारं तुल्का यामोत्तरं अगस्त्ययेनमः माधवाय। मुचुकुंदाय। कपिलाय। आस्तीकायनम
इति नत्वा प्राच्यां दक्षिणतो वा शिरः कृत्वा स्वपेत्। तत्र त्रिस्थियाकृता वाद्यादिन चतुर्थ्येकादश्यात्र
योदश्याव र्षषोडशादिनमध्ये चतुर्थी षष्ठ्यष्टमी चतुर्दशी पर्वद्वय श्राद्धतस्तूर्वदिनभिन्नाःपारा
त्रौत्रानिर्विभौमवर्ज्यं तरणीकृत्तिका मघा पूर्वाचित्रा श्लेषा ज्येष्ठा मूल पूर्वाषाढा पूर्वाभाद्रपद
त्रिजन्मसंक्रमपातवैधृतिवर्जं संगं हत्वा मंत्रा त्रिगुणं शोधं स्नानं च कुर्यात्। एतत्सर्वमागुक्तं।

स्मृ० ६५

अनंतोस्मा नवकं कृत्वा समुपेत्। इत्थमाह्निकं सत्यमहं कुर्यात्। इति श्रीकमलाकरभट्टकृते स्मृ-
धर्मे स्मार्ताह्निकं॥ अथ स्मार्तस्य पार्वणश्राद्धप्रयोगः स चोपदेश ब्राह्मणवत्सादि नियतश्राद्ध-
पाकार्थ इति मदनपालः। तन्न। अनियतस्य धर्मत्वायोगात्। तेन स्मार्तानां जसनेयिन इति त्रि-
उग्रं येदृक्षोक्के हरिहरस्म ष्यादिमेवाद्याश्चिष्टाचाराच्चमाधं हिनत्राद्यो चते कृत्वापूर्वेद्यु
निरामिषं सकृद्भुक्त्वा मेरोषिपरेद्युः प्रातर्वा द्विजगृहं गत्वा मंडलेन समुपवेश्य पाद्येन दक्षिणं जा-
न्वाच्य स्मार्तः प्रणति पूर्वकामिति वचनात् प्रणम्य देशकालौ स्मृत्वा स्मृः करिष्यमाणपार्वण-
श्राद्धे पित्रादित्रयमातामहादित्रयविश्वेदेवार्थत्वामहं तानि मंत्रये पाद्य क्षण दत्वा सवृभिः
प्रसादः कार्यं इति फलतं तांबूलं वारलेबेकं द्वौ वा विप्रोमित्मंत्र्य तथा मातामहत्रितो सो ति ताते नो के
...कोधनैः शौचपरैः सततं ब्रह्मचारिभिः नवितव्यं भवद्भिश्च मया चश्राद्धकर्मणि। सर्वे हि ६५
...मवीयान्संविनिर्मुक्तैः कामक्रोधविवर्जितैः॥ भवद्भिर्भवितव्यं नः श्वोभूते श्राद्धकर्मणि

153/1951

तिजपेच्छृणुयाद्वा॥ ततस्तथैवापसव्येन वामं जान्वाच्य स्मार्तः करिष्यमाणश्राद्धे पितृस्थाने
त्वामहं निमंत्रये। एवं पितामहस्थाने प्रपितामहस्थाने च। एवं मातामहादिस्थानेत्रयं तिष-
द्धात् वैश्वदेविकेचत्वार इति दर्शः। तत्र वैश्वदेव पक्षे द्वौ। एकोद्दिष्टे वैतंत्रेण। पित्रादावेकोमातामहा-
हादौ चैक इति त्रयोवा। यद्वा पक्षमेकः। देवे चैक इति द्वौ। तदा मातृपोडशा विमर्शं। पितृपद
पितृशोमातृमधंनववरैदैवसेमातामहाश्रंतद्वारद्वादैवतं श्राद्धमुक्तमिति। तथा पितृश्राद्धाचाराद्यु-
वस्था। षड्दैवतमेवतु बऊ संमतं। सर्वथा विप्राल्लाभेदर्भवटुं निधाय श्राद्धं कुर्यादिति मत्स्योक्तेः एवं
कृत्वा तद्द्रामा केत्रिंशा पदं द्वार भोवासिपेत। सर्वत्रामंत्रितो सौति मत्स्योक्तेः क्रोधनैरितिजप
श्च ततः परेद्युः प्रातः स्थानोपलेपनं कृत्वा सेचं कृत्वा ततः श्राद्धसामग्रीं संपाद्यादिनस्यपंचमु-
हूर्तानंतरं द्विजान्नाहूय पुत्रे ष्वामनिषिद्धदिने श्मश्रुकर्मकारयित्वा नीयजलंतैलामजकोद्-
र्तनानि प्रेषयित्वा मध्याह्ने स्नानागतान्प्रांजलिरित्यरागतं रद्वासुस्वागतमिति तै रुक्ते

श्रा.क्रि०
६६

द्विराचम्य। देशकालौ स्मृत्वा। अस्मत्पितृपितामहप्रपितामहानां काश्यपगोत्राणाम् अमुकशर्माणां
वसुरुद्रादित्यरूपाणां पार्वणश्राद्धं सदैवं सपिंडं पार्वणविधिनामेन हविषा अद्य करिष्ये इति सं
कल्प्य गोमूत्रगोमयाभ्यां द्वारे भूमौ देशमात्रम् उत्तरदक्षिणप्लवं चतुरस्रं च मंडलं कृत्वा। तत्र कु
शान् दैवे पूर्वाग्रान् पित्र्ये तिलान् प्रक्षिपेदिति मदनपालः। तत्र तु अस्मात् प्राङ्मुखासनमिति वचना
द् उदङ्मुखं पाके त्वोत्तरे उदङ्मुखः। सव्येन पुरूरवार्द्रवसंज्ञका विश्वेदेवाः स्वागतमिति ते नोक्ते।
गंधपुष्पैः सव्यं स्वरूपायेति वचनाद् आदौ सव्यं ततो दक्षिणमिति पादौ संपूज्य पुरूरवार्द्रवसंज्ञ
का विश्वेदेवा इदं वः पाद्यम् अर्घ्यं च नम इति पादयोर्जलं दत्वा एवं देवद्वितीयेऽपि। पित्र्य
विधिं कृत्वा अपसव्येन अस्मत्पितः काश्यपगोत्र अमुकशर्मन् वसुरूप इदं ते पाद्यम् अर्घ्यं नमः। एवं पि ६६
तामहे प्रपितामहे च रुद्ररूपादित्यरूपेति शेषं। एवं मातामहादित्रये च [illegible]
[illegible] उदङ्मुखे देवे प्राङ्मुखो देवेभ्यो नमः। इदमासनम् आस्यतामिति वामेनासनं [illegible]

155
1951

विश्वान् पूर्ववत् पित्र्ये अपसव्येनोदङ्मुखात्। ततः मातामहानां श्राद्धं एवमाने च पा
दशौचेन तथाचैव। विकिरे पिंडदाने च द्विराचमनमिष्यते। ततः सव्येन कर्मपात्रं अर्घ्यं गंधपुष्प
कुशान् निक्षिप्य तज्जलेन। अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा। यः स्मरेत् पुंडरीकाक्षं स
बाह्याभ्यंतरः शुचिः। पुंडरीकाक्षाय नमः। श्राद्धीयद्रव्यं प्रोक्ष्य। तिला रक्षंत्वसुरान् दर्भा रक्षंतु
राक्षसान्। पंक्तिं वै श्रोत्रियो रक्षेद् अतिथिः सर्वरक्षकः। इति तिलान् विकीर्य प्रतिदिक्षु [illegible]
त। आमात्राद्यानां पवित्रतां [illegible]। सप्तव्याधा दशार्णेषु मृगाः कालंजरे गिरौ चक्रवाकाः
सरद्वीपे हंसाः सरसि मानसे तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः प्रस्थिता दीर्घमध्वानं
यूयं तेभ्योऽवसीदथ अमूर्तानां च मूर्तानां पितॄणां दीप्ततेजसां। नमस्यामि सदा तेषां ध्यायिनां
योगचक्षुषां श्राद्धं [illegible] गां ध्यात्वा ध्यात्वा देवजनार्दनं वस्वादींश्च पितॄन् ध्यात्वा ततः श्राद्धं प्र
वर्तयेदिति जपेत्। ततो नीवीबंधं अपसव्येन च देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वा

श्र॰ सं॰
६१

हायैस्वधायैनित्यमेवनमोनमइतित्रिर्जप्त्वादेवश्राद्धकालोयमन्वाकाश्यपगोत्राणामस्मासित्पिता
महप्रपितामहानाममुकदासानां। तथाकाश्यपगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमा
तामहानाममुकदासानांसदैवमुपक्रांतपार्वणश्राद्धमहंकरिष्ये। कुरुष्वेतितैरुक्तेदक्षिणंजा
न्वाच्य। पित्रादित्रयमातामहादित्रयस्यसंबंधिनःपुरूरवार्द्रवसंज्ञकाविश्वेदेवाःस्मामनेनेत्येनम
इत्यनुज्ञामागम्यकुशपत्रद्वयमासनेदद्यादितिदोदयपद्धतौ। षष्ठीतुपुत्रका। दैवेक्षणःक्रियतामिति
कुशान्दत्वातथेतितैरुक्ते। प्राप्नोतुभवान्प्राप्नवानीतिविप्रः। एवंद्वितीयेपिदैवे। ततोपसव्ये
नवामजान्वाच्यकाश्यपगोत्रासितरमुकदासवसुरूपस्यमासनंतेस्वधानमःइतिवामेनसति
लदर्भयुक्तकुशानदत्वापित्र्येक्षणःक्रियतामित्यादिप्रागवत्। एवंपितामहादीन्मातामहादींश्च
॥सव्येनविश्वान्देवानावाहयिष्येइतिपृष्ट्वाआवाहयेत्यनुज्ञातःदैवद्विजकरमं[illegible]
॥विश्वेदेवासआगंतुमहाभागाविश्वेदेवामहाबलाः। येपत्रविहिताःश्राद्धेसावधानाभवंतुतेइतिम

157
1951

त्वापुरूरवार्द्रवसंज्ञकविश्वेदेवाः। आगच्छंतुसुखा। पादयदिस्मृतंतिलान्किरेदितिकर्कःयवैर
न्ववकीर्येतिस्मृतेयवानित्यन्ये। ततोहस्तोरकं। एवंप्रतिपदार्यं ततोपसव्येनकाश्यपगोत्रान
स्मत्पितरमुकदासकाश्यपगोत्रवसुरूपआगच्छ। एवंपितामहरुद्ररूप। प्रपितामहादित्यरूप
॥एवंमातामहेषु। ततःदैवासव्येनएकपात्रेद्विकुशपत्रेकृत्वादेवतीर्थेनदेवेभ्योनमइतिजलं
॥नमइतियवान्गंधपुष्पेचाक्षिपेत्। ततोपसव्येनपित्र्येषट्सुराजतताम्ररखड्गपत्रा
दिमयपात्रेष्वेकैकस्मिन्द्वेद्वेदक्षिणाग्रेपवित्रेकृत्वापितृभ्योनमइतिजलं। तिलेभ्योनमइतिति
लान्। गंधपुष्पाणिचक्षिप्त्वातानिपात्राणिसंपन्नानीत्युक्त्वासुसंपन्नानीत्युक्ते। सव्येनदैवकु
शपवित्रेधृत्वादक्षहस्तस्थेनपात्रेणपित्रादित्रयमातामहादित्रयसंबंधिपुरूरवार्द्रवविश्वेदे
वाएषवोर्घोनमःइदंवोअर्घ्यंनमइतिवादत्वास्वधानमइति। स्ववकरत्तिमंत्रैर्वृद्धितोयेदत्तमपात्रेपु
वित्रादिकृत्वा। दैवेर्घःस्थानमसीत्युत्तरतोन्युब्जंकुर्यात्। केचिद्दत्तदैवेनेच्छंति। न्युब्जतामेतिदै

श्रा०प० ६८

द्रं। ततोपसव्येन पित्र्यकरे दक्षिणाग्रं पवित्रं दत्वा व। इयपगोत्रास्मत्पितरमुकशर्मन् एष तेऽर्घः
स्वधा नमः इति पितृतीर्थेन दत्वा ऽस्येयो नम इति संस्र। वाननुमंत्र्य। तत्र १ वित्रारिध्य वैवं पितामह
प्रपितामहाभ्यां मातामहादिभ्यश्च दद्यात्। ततः प्रथ। मपात्रे संस्रवानेकीकृत्य पितृपात्रमेकं कृत्वा
दक्षिणे पितृभ्यः स्थानमसीति सुब्जं कृत्वा दक्षिणं। नचालयेत्। ततः सव्येन जलं दत्वा विश्वे
देवा एष गंधो वो नमः इमानि पुष्पाणि वो नमः। एष धूप दीपाच्छादनयज्ञोपवीतालंकारं तां
बूलानि दत्वा जलं दत्वा पसव्येन काश्यपगोत्रास्मत्पितरमुकशर्मन् एष ते [illegible] पुष्प
धूप दीपाच्छादनालंकारान् दैवं पितामहप्रपितामहा। [illegible]दद्यात्। एवं मातामह [illegible] नम
र्णतां वाचयित्वा द्विजाग्रे तु वंसम्य पलाशादिपत्रावलीर्निर्माय गोरस [illegible]
[illegible] मान्नादिसंस्कृत्य अग्नौ करिष्य इति पृ। कृतधर्मिस्पृष्टा कुलेषु [illegible] ।।६८
[illegible] प्रमुखे स्मर्तव्या यावि हीन धर्मेण द्विराज्ञाय अग्नये कव्यवाहनाय नमः इति कु [illegible]

सर्वो हताश्रमेति मत्वा पुनराहाय सोमाय पितृमते न। मः। इदं सोमाय पितृमते। अपसव्य पक्षे सो
माकृति पर्वः अस्माकृति ह न्नरा। इति कृत्वा कृत शेषं। पिंडार्थमवशेष्य पितामहादि मातामहा
दिपात्रेषु तच्छेषं दद्यात्। ततो दैवे न्यस्य मंत्रं त्वा पात्रे। एव भिद्यार्थ दैवपूर्वमामं चतुर्गुणं द्विगुणं
समं वा दत्वा प्रोक्ष्य दैवे दक्षिणं जानुं वाच्योपवीती। दक्षिणेन ताननस्य नीचामं पात्रमालभ्य वि
श्वेभ्यो नम इति विष्णो हव्यं रक्षस्वेति वा द्विजांगुष्ठं नि। वेश्य पित्र्ये पसव्येन पात्रमालभ्य गुष्ठं न्यस्य
तिलानवकीर्यो स्वकं सत् स्थाने वं प्रतिपात्रे कृत्वा भा। जनं दैवपात्रं धृत्वा दक्षिणे कुशाय जलान्यस्य
पित्रादि त्रय मातामहादि त्रय श्राद्ध संबंधि पुरूरवा। र्द्रव संज्ञका विश्वेदेवाः इदं वः स्वामान्नं स प
रिकरं गयेयं भूः अन्नदाधरा गोत्राः आमं च ब्रह्मगस्ता। ताम्रस्य रूप्यनामं मनः कल्पितं सुवर्णपात्र
स्थमक्षय्यं वरद्वाया स्यो पुरूरवा र्द्रव संज्ञकेभ्यो। विश्वेभ्यो देवेभ्यः अक्षय्य तृप्त्यर्थं संप्रददे स्वाहा
नमम इदं मामं सोपस्कर ममतः पेण संपद्यतां हव्यं न मः। कव्यं विश्वेभ्यरपादे स्वमक्षण्य म

श्रा० ६९

स्तु। गयां गदाधरः प्रीतो भवतु। ततोऽपसव्येन द्विगुणभुग्नकुशान्तिलजलान्यादाय पश्चिमेन पात्रे धृत्वा
वामं जान्वाच्य काश्यपगोत्रास्मत्पितरमुकशर्मसे न तत्रैश्चात्रमान्नसपरिकरं गयायां मेरितादि रजतपा
त्रस्थमक्षय्यवटछायायां स्थित्वा काश्यपगोत्रामस्मत्पितरमुकशर्मासापत्नसुरूपाय रमामं मेसोपस्कस
क्षय्यतृप्त्यर्थं मम हृदे स्वधा नमः अमृतरूपेण स्वधा संपद्यतां कुशेन नमः [illegible] सादिप्रभवत॥
एवं पितामह प्रपितामह योर्मातामहादिभ्यश्च दद्यात्। अत्र संस्कृतभमी [illegible] तिविकिरेत्
मम्यादायाग्निदग्धेभ्योनग्निदग्धेभ्यश्च षडुद्दिष्टपिंडेभ्नम इति सोदकमा [illegible] तिलोदकं
षु संस्थानमेव भवति पुत्रिके इत्युक्तं मचेताः। न प्ररोहं दहेन्नैव किंचिद्देयं परिसज्जेत् यमः प्रेतदेहं तु
मे गंधैः स्नापितं स्रग्भिर्भूषितं क्रियानिबंधे गारुडे उदधारामविच्छिन्नां भिंचेत्कर्ता प्रदक्षिणं
स्कंधाव सक्तकुंभेन पाहृतः परितस्त्रितः। देवयमोरेकदा मृतौ तु बौधायनः। दग्धं तमेकतंत्रत्वं
संचयनं चैकं उदकपिंडदानादि पृथगेव। अन्वारोहणे चैवं उदकदानं ब्रूते आदौ तु व
ह्नि प्रक्षाल्यात्ते नैवाच्छादितेस्ततः कर्तव्यं तैः सचैलं तु स्नानं सर्वमलापहं ततः पाषाणदेहेलु
[illegible] भिन्नाच्छूनाय दद्यात्तु प्रेतभूमिगताय च विशेषो निर्णयसिंधौ ज्ञेयः अथ
[illegible] समये नदेशकालौ स्मृत्वा काश्यपगोत्रस्यास्मत्पितुरमुकदासप्रेतस्य प्रेतत्व
[illegible] सामर्थ्यमौर्ध्वदैहिकं करिष्ये इत्युक्त्वा मृतिस्थाने दर्भे काश्यपगोत्रामुकदास
[illegible] ते पिंडः मम वनेजनं च एवं उत्थापनपिंडं दत्वा प्रेतवस्त्रे पिंडं बध्वा शिरसि

2076
1951

[illegible] तुष्पथे विश्रान्तौ चितायां चैवं देयाः। ततः शुचिदेशे पंचभूसंस्कारं कृत्वा दसंज्ञका
ग्निं प्रज्वाल्य गंधमाल्यैः संपूज्य प्रेतस्य वपनं कारयित्वा स्नापयित्वा स्नापयित्वा गंधमाल्यैरलंकृत।
मुरस्य समच्छिद्रेषु हेमशकलान् न्यस्याच्छादित्वाज्यं वा क्षिप्त्वा नववस्त्रावेष्टितं घृताक्तं कृत्वा चितौ उ
त्तरशीर्षमधोमुखं पुरुषमुत्तानां स्त्रियं निनाय अमो संस्कार्यलोकाय स्वाहेति तद्धीवाज्या
हुतिं दत्वा शिरःस्थाने अग्निं दद्यात्। मंत्रस्तु वाराहे कृत्वा तु दुष्कृतं कर्म जानता वाप्यजानता म
त्युकालवशं प्राप्य नरं पंचत्वमागतं। धर्माधर्मसमायुक्तं लोभमोहसमावृतं। दहेयं सर्वगात्रा
णि दिव्यान् लोकान् स गच्छतु ज्वलमानं महावह्निं शिरःस्थाने प्रदापयेत्। चतुर्वर्णेषु संस्था
नमेवं भवति पुत्रिके। चतुर्वर्णो क्रियानुपनीतद्विजपरा। क्रियानिबंधे गारुडे तन्मंत्रः उक्तः
त्वं न तन्न जातस्त्वं नेतस्य लोकपरिपालकः। उक्तः। संहारकस्तस्मादेनं स्वर्गं नयेति ततः कि
चिच्छेषं दग्ध्वा। तेकुंभमादाय पादतो प्रदक्षिणं त्रिः परिक्रम्य त्रिरुत्तमनाकुंभं भित्वा कुंभं क्षिप्त्वा वे

श्रा ५०
७३

ह्माणा। बालपुरःसरा जजंगता पूर्वधृतं वस्त्रं प्रक्षाल्य पुनः परिधाय वामानामिकया जलमा
लोड्य हृष्टाद्याः स्नात्वा तीरे दर्भे पाषाणं निधाय कृतजुदर्भ तिलपूर्णांजलिं काश्यपगोत्र अमुक
दास प्रेत एष ते तिलांजलिः उपतिष्ठतु। उपतिष्ठतु। उपतिष्ठतामिति वा सर्वे दक्षिणामुखा स
कृत्त्रिर्वा दत्त्वा पुनः स्नायुः मित्रो दानं च कन्यामातुलेय श्वश्रू श्वशुर मातामह ततस्त्रीमातुला
णाउदककरणं कृत्वा कृते। क्लीबनर्त्रगर्भघ्नी पतितैः हरकं न कार्यं तेभ्यो प्युम्येो। एवं [illegible]
शाह शावाहिना निमग्नं दृष्ट्वा त पत्थर मेकं शृङ्गि दिक्कवृद्धि लिक [illegible] द्विवाकायो। ततो बालपुरः
सराजलाहृत्री यथोद्दिष्टं वस्त्रं निष्पीड्य गृहद्वारि स्थित्वा त्रीणि निंबपत्राणि विदश्य चम्य गोमय
[illegible] नाल समारम्भं निपदं निधाय गृहं प्रविशेयुः हृष्टाः शोकापनोदनं कुर्युः। ततो
[illegible] हं अहं वा प्रेताय स्नाहीति जले पिबेदमिति क्षीरं निरत्थाव [illegible] मिति
[illegible] त्रो जेनसमयेन संकल्पयेत्। ततस्त्र हमुपवासः [illegible]

[illegible] सर्वेषां यावदाशौचं प्रथमतृतीयसप्तमदशमेषु वाह्नातीनां सह भोजने न
त्रुहिर्वैवा बहिः प्रेताय दशपोदेय इत्याहिनिर्णयसिंधौ जे यं अयसंचयनं। तत्र प्रथमद्वितीयतृती
य चतुर्थसप्तमनवमेषु शूद्राणां विशेषतो दशमेकि तदुत्तरं तु भौमार्कमंदं तिथियुग्मे कपाद
द्विपाद त्रिपाद द्विपाद त्रिपाद कर्तनक्षत्रवर्जं दिने कार्यं। कर्ता देशकालौ स्मृत्वा स्मत्पितुः काश्यप
गोत्रस्यामुकदास प्रेतस्य प्रेतत्वनिवृत्त्या उत्तमलोकप्राप्त्यर्थमस्थिसंचयनश्राद्धं करिष्ये इत्युक्त्वा
कुशबटुं निधाय। इहलोकं परित्यज्य गतोसि परमां गतिं मनसा वायुरूपेण विप्रेत्वाहं नियोज
ये। अमुक प्रेतेदं त आसनमुपतिष्ठतां। एवमर्घ्यः गंधः पुष्पं धूपो दीपश्चाच्छादनं उपतिष्ठतां
एवं कृत्वा दद्देवताभ्यः प्रेताय नमस्कृत्य मंत्रेणापामार्गानि दत्वा घृतक्षीरोदकैः स्थितिं प्रोक्ष्य
पलाशशाखया चितेरस्थीनि पोड्शांगुष्ठ कनिष्ठाभ्यां शिरसउरसः पादयोरस्थीन्यादाय पंच
गव्येन गंगोदकेन प्रक्षाल्य गंधाद्यर्चितानि क्षौमेणावेष्ट्य नवकुंभे निधाय शरावेण पिधाय

श्रा.द०
१४

नेवृक्षमूलेवाम्भसो निखायमनस्मनद्यांक्षिप्त्वाचितिरेत्रोवेदां कृत्वातत्राक्काराम्पोपत्रच्छत्रप
ताकायुतंकुंभत्रयंसंस्थाप्यक्रव्यादहेवतास्मःप्रेतायतत्रखिम्मश्चनिवेद्यकुंभेषुपिंडान्
दद्यात्। मंत्रस्तु जमःक्रव्यादमुखेभ्यो देवेभ्यइह सर्वदा॥ रमशानवासिनो देवाःश्मशानोपरि
कीर्तिताः तेभ्योन्नमुदकंकुंभमक्षकंकुंभमक्षय्यमुपतिष्ठतु मंत्रश्मशानेदेवाःस्युर्भगवंतस्स
नातनाः नेस्मत्सकाशाद्दत्तुवलिमष्टागमक्षयं प्रेतस्यास्यशुभान्लोकान्प्रय[illegible]
तान्। अस्माकमायुरारोग्यंसुखंचददताचिरं। इतिप्रथमंश्मशानवासिभ्योमध्यमंप्रेतायत
द्दक्षिणेतस्मात्तमश्चदत्वालायात्। त्रिषष्ठ्यस्थीनिगंगायांक्षिपेद्वा। तद्विधिस्तु। हेमश्राद्धं
तर्पणं[illegible]स्थीनिपंचगव्येनप्रक्षाल्यहेममुक्तारूप्यप्रवालकान्यस्थिमध्येक्षिप्त्वाती
र्थंगत्वा[illegible]नेनप्रोक्ष्यहिरण्यमधुाज्यतिलैःसंयोज्यमृत्पिंडेनिधायदक्षिणा
[illegible]येतिजलंप्रविश्यसमेप्रीतोस्त्विति क्षिप्त्वाविप्रोभ्योदक्षिणांदत्वा[illegible] ८

५

211
1951

श्राद्धंतर्प[illegible]कुर्यात्। अत्रदशदानगोदानगोदानादिकुर्वंति। इदमधिमासशुक्रास्ता
दौनकार्यं। दशाहमध्येतुनदोषः। अथपाथेयश्राद्धं कारणपुगोत्रम्मामुकदासप्रेतस्यम
नुलोकात्प्रेतलोकंगच्छतः पाथेयसिध्यर्थंपाथेयश्राद्धंकरिष्येइत्युक्त्वाकुशबटोइहलोकं
परित्यज्येतिमागुक्तमंत्रोंतेइदंतेआसनमुपतिष्ठतां। एवमर्घ्योगंधःपुष्पंधूपोदीपआच्छाद
नमामान्नंचोपतिष्ठतामितिसर्वत्रवदेत्। ततःइदंतेपिंडासनं। अवनेजनं। पिंडःअवनेजनं पिंड
प्रजादक्षिणाच। अयमेवसर्वप्रेतश्राद्धानांप्रयोगः एवंनग्नप्रच्छादनेश्राद्धंकुर्यात्। अश्मस्था
दानं अथनवश्राद्धं तच्चविषमदिनेषुप्रथमतृतीयपंचमसप्तमनवमेकादशेषुकार्यं। अ
मुकप्रेतस्यप्रेतत्वविमुक्त्याउत्तमलोकप्राप्त्यर्थमाद्येह्नि विषमश्राद्धंकरिष्ये। अत्रविप्रन्निमं
त्रणेमंत्रोवाराहे। गतोसिदिव्यलोकंत्वंकृतांतविहितात्पथः। मनसावायुनातेनविप्रेत्वांहंनिमं
जये। पूजयिष्यामितेगोमीस्त्वामेवंविप्रंनिमंत्रयेत्। अन्यत्माग्वत्। नवश्राद्धे नवसप्तकिरातः

नवश्राद्धमनुक्रमात्। आद्यंतयोर्वर्णयोस्तु षडिमाऊर्महर्षयः। अयमेतत्पिंडाः ते चामान्ने
नैवेतिहलायुधः। चरुणेत्यन्ये। यच्च पिहेमाद्रौ पारस्करेणाष्टदेत्रिंशत्पक्षकोर्त्तिताइत्युक्तं त
द्यापिमेतस्मः सर्ववर्णेभ्यः पिंडान्दद्याद्दशैवेवेतितेनेवोक्तदशैव। अन्येतुयावद्दशाहोच प्रेतस्यो
दकं पिंडं चदद्युरितिविष्णुक्तेर्त्रिरात्रादिदशाहतिपंचदशरात्रपक्षेषुतत्संख्यया पिंडाइत्याऊः हेमा
द्रौ ब्रह्मतेतुविमाम्येषु दशोपिंडपक्षेत्यपिंडोत्कर्षउक्तः देयस्तुदशमः पिंडोराज्ञांवै [illegible]
नि वैश्यानां वै पंचदशो मासेशूद्रे प्रदीयते। सद्यः शौचे प्रदातव्यान्तत्रैव हि। सद्यः शौचेपदात
व्याः सर्वेपियुगपत्तथा। महाशौचेप्रदातव्या प्रथमेन्येक एव हि। द्वितीयेह्नि चत्वारस्तृ
तीये पंचचैव हि। शातातपः। आशौचस्य च ह्रासेपि पिंडान्दद्याद्दशैव तु। आशौचोत्तरं दृष्टेप
यु[illegible]मः अत्रदेशाकर्तृच्छैकस्य हेयं। प्रथमेह्नि यद्धंतदेवसमाद्दशाहिकं। य
[illegible]सर्वसमापयेदितिक्रियानिबंधेव्यासोक्तेः। आद्ये प्रथमेह्नि पोदद्यात्।

213
1951

[illegible]माहितः। अन्येनवसुचाम्येषुसएव प्रदद्यात्स्मपि। दाहकर्त्रौंवदश्राहं कुर्यादिति
मिताक्षरायां। शुद्धितत्वेवायवीयेपि। असगोत्रः सगोत्रोवायदिस्त्री यदिवापुमान् प्रथमाग्नि
दातायेतस्यपिंडं दद्यात्स एव हि। कर्तृमतो नुतत्रैवहस्यात्। एवं क्रिया मध्ये तात्यां यदि कश्चि
द्विपद्यते। तदधुना क्रियाकार्यासवैर्वा सह कारिभिः। अन्येनशेषः कार्य इतिगौडाः। आदि
तः सर्वमित्यन्ये। आदिपुराणे। उपतिष्ठतामयं पिंडः प्रेतायेति समुच्चरेदिति। अथ प्रयोगः
ऐशान्यां वेदिं कृत्वा तेज सेमन्मयेवा चरुं श्रपयित्वा सक्तुनावातिलमधुघृतयुतं कपित्थमा
मात्रं पिंडं कृत्वा तिथ्याद्युक्त्वाकाश्यपगोत्रस्यामुकप्रेतस्य मरणदिवसादारभ्य यवसंनत्वेप्रथमा
ह्निकदेहपूरकपिंडदानं करिष्ये द्वितीयाह्नाग्रौद्वितीयादिके त्वादितः पाषाणमंत्रेविष्णुस्म
त्यवनेजनमसि नमवनेजनं चकृत्वा मुकप्रेतेत्यादि सधवियवसंनत्वे देहपूरकः प्रथमाह्निक एष
ते पिंड उपतिष्ठते पिंड उपतिष्ठतां। प्रत्यवनेजनं। भृंगराजतुलसीपत्राणि पिंडजलेक्षिपे

श्र.द॰ त्। अंजलिदानं तत्क्रमेण। एवं दशाहं। तत्र संकल्पे विशेषः। चक्षुःश्रोत्रनासामुखावयवनिष्प
९६ त्त्यर्थमिति द्वितीये। गलांसभुजवक्षोनिष्पत्त्यर्थमिति तृतीये। विषमश्राद्धं च। नाभिलिंगगुद
निष्पत्त्यर्थमिति चतुर्थे जानुजंघापादावयवसिद्ध्यर्थमिति षष्ठे मज्जामेदोमांसस्नायुनाडी
रूपावयवसंपत्त्ये इति सप्तमे। विषमश्राद्धं वा। दंतलोमनखावयवसिद्ध्यर्थमिति अष्टमे। वीर्यावय
वसिद्ध्यर्थमिति नवमे। विषमश्राद्धं च। देहपूर्णत्वतृप्तताक्षुद्विपर्ययसिद्ध्यर्थमिति दशमे। दि
न दशमं जलिसंरब्धसोदकुंभाश्च देयाः। अतश्शक्तौ तु पिंडयज्ञावृता देयं प्रेतायान्नं दिनत्रयमि
ति ज्ञेयं। अपरार्के व्यासः। आशौचांते द्वितीयेऽह्नि क्षौरं जनन्याश्च गुरौ मते। आपस्तम्बः। अनुभाविनां
च परिवापनं अनुभाविनः कनिष्ठा इति मिताक्षरा रत्नाकरादयः। आशौचमनुभवंतस्तासां सर्वे
षां वपनमिति विज्ञानेश्वरा हरदत्तादयो गौडाः। तद्व्यंजनेऽसमालयं। आजन्मानं रपते द्विजन्मनां दारकर्म
मरणस्य च पुंसां। बंधमोक्षमखदीक्षणेषु अपि क्षौरमिष्टमखिलेषु चोडुषु। अपरार्के व्यासः

215/1951

पुत्राः पत्न्यः सपत्नीकं कुर्यादिति तेषां यथाविधि। पिंडदाने विनोऽन्योऽपि कुर्यादित्युक्तं समाहितः। पुत्रा
णां माध्यंदिनीयोः समुच्चयः। दशादिनेऽलवयवपिंडं दत्वा त्रिकोणं वेदिं कृत्वा स्नानं तैलेनाभ्यज्य
जले क्षिप्त्वा प्रेतस्पृष्टवाससी त्यक्त्वा पुत्राः पत्न्यः सर्वे प्रेतान्यवयवसंश्चवपनं कुर्युः। ततः स्ना
त्वा सर्वे त्रिधर्मोदकांजलिं दत्वा सर्षपकल्केन तिलामलकैर्वा स्नात्वा गृहं व्रजेयुः। दशाहम
ध्ये दर्शे तु माधवीये ऋष्यशृंगः। आशौचमंतरा दर्शो यदि स्यात्सर्ववर्णिनां। समाप्तिं प्रेततं
त्रस्य कुर्यादित्याह गौतमः। श्लोकगौतमः। अंतर्दशाहे दर्शश्चेत्तत्सर्वं समापयेत्। पित्रोस्तु
यावदाशौचं दद्यात्पिंडाननुजलांजलीन्। इमं पित्र्यमत्सुमध्ये दर्शे तदूर्ध्वं दर्शे तु पित्रोः पिंडं संस
माप्यमेव। पित्रोराशौचमध्ये तु यदि दर्शः समापतेत्। तावदेवोत्तरं तंत्रं पर्यवस्येत्सरमि
ति गालवोक्तेः। अन्येषां तु दशाहमध्येऽपि समाप्य कालादर्शे निर्णयामृते चैवं। मदनरत्नेपारिजा
तयोस्तु गालवीयमापन्नोरसपुत्रादिपरं। पित्रोरहो धर्मपिनाकर्षं इत्युक्तं। तत्रमूलं चिंत्यं।

श्रा.क. ॥ इति श्रीकमलाकरभट्टकृते शूद्रधर्मे शूद्रधर्मे शूद्राशौचांतकृत्यं च। अथैकादशाहः। म
९७ नुः। विप्रः शुध्यत्यपः स्पृष्ट्वा क्षत्रियो वाहनायुधे। वैश्यः प्रतोदं रश्मीन्वा यष्टिं शूद्रः कृतक्रियः॥
शुद्धितत्त्वे देवलः। अद्याहः सु निवृत्ते तु सुस्नाताः कृतमंगलाः। आशौचाद्विप्रमुच्यंते ब्राह्मणा
न्स्वस्ति वाच्य च। इदं सपिंडनोत्तरमिति शिष्टाः। हेमाद्रौ ब्राह्मे। आद्यं श्राद्धमशुद्धोपि कुर्यादेका
दशेऽहनि। कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः। श्राद्धेप्येवं। तदाह पैठीनसिः। एकादशा
ह्नि यच्छ्राद्धं तत्सामान्यमुदाहृतं। चतुर्णामपि वर्णानां सूतकं तु पृथक् पृथक्। यत्तु मरीचिः
। आशौचांते ततः सम्यक् पिंडदानं समाप्यते। ततः श्राद्धं प्रदातव्यं सर्ववर्णेष्वयं विधिरि
ति तन्नर्षेषां द्वादशाहपरं यत्तु मात्स्ये। एकादशेऽहनि तथा विप्रानेकादशैव तु। क्षत्रादिः सूत
कांते तु भोजयेद्युजो द्विजानिति। तद्गणश्राद्धपरं रुद्रमुद्दिश्यैकत्र्यंबमेतत्प्रीतिकरं हि
तद्दिने च नास्तीति मदनपारिजातः। कल्पतरुशूलपाणिवाचस्पत्यादयस्तु श्राद्धवचनादथा

217/1951

शौचापगम इति विज्ञानेश्वरः। प्रागुक्तशंखादिवचनान्मेधावानाकरत्ना शूद्रादीनामप्याशौचांत
एवाहुः। अस्मे तु द्विविधवाक्यवशाद्देशाचारतो व्यवस्थामाहुः। सद्यःशौचे दशाहमध्ये तस्यैकादशे
ऽहनि उक्तानां। अहाशौचेपि कर्तव्यमाद्यमेकादशेऽहनि अतीतविषये सद्यःस्नानादेर्ध्ववादि
ष्यते। हेमाद्रौ बौधायनः एकोद्दिष्टं तु एवं स्यादेकादशेऽहनि वा पुनः। अनत्र धर्मयुग्मेषु कुर्वीताहःसु
शक्तितः। अर्धमासे प वा मासि कृते संवत्सरेपि वा। अथ वृषोत्सर्गः। हेमाद्रौ मात्स्ये कोमैंच
। न करोति वृषोत्सर्गं सुतीर्थे वा जलांजलिं। न ददाति सुतो यस्तु पितुरुच्चार एव सः। एष्टव्या
बहवः पुत्रा यद्येकोपि गयां व्रजेत्। यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत्। षड्विंशन्मते। ए
कादशेऽह्नि प्रेतस्य यस्य नोत्सृज्यते वृषः। प्रेतत्वं सुस्थिरं तस्य दत्तैः श्राद्धशतैरपि। यत्तु हेमाद्रौ भ
विष्ये। चैत्र्यां वापि तृतीयायां वैशाख्यां द्वादशेऽह्नि वा। यत्तु विष्णुधर्मे विषुवे द्वितीये चैवमस्ता
हे वा ध्रुवस्य चेति। तत्पूर्वासंभवेत्रेयं प्राप्तो। लोहितो यस्तु वर्णेन मुखे पुच्छे च पांडुरः। श्वेतः

वृ० ९८ सुरविषाणाग्रां सनीलो वृषउच्यते। देवीपुराणे। चतस्रो वत्सिका मध्ये देयस्तं नव लोपिवा। अथप्र
योगः। तत्र पूर्वं विष्णुरूपिमे ततर्पणमुक्तं देवजानीये। तत्र मूलं चिंत्यं। उपवीती देशकालौ स्मृत्वा
काश्यपगोत्रस्यामुकशर्मणः प्रेतस्य प्रेतत्वनिरासार्थं रुद्रलोकप्राप्त्यर्थं वत्सादिलोकप्राप्त्यर्थं वा वृ
षोत्सर्गं करिष्ये इत्युक्त्वा नंदाहि सुमनाश्चैव सुशीला च यशस्विनी। सुरभिः पंचमी प्रोक्ता इति
वृषमातृः पूजयेत्। ततः ऐशान्यां कुंभे रुद्रं संपूज्याग्निं प्रतिष्ठाप्य ब्रह्मासनं कृत्वा प्रणीतापात्रे
द्वयोर्नागयोर्जलक्षीरे प्रणीय पायसं पिष्टं च कृत्वा चरु कृत्वा आज्ये। इहरतिः षट् च आज्यभाग
वतः। परमितिस्मृतेरग्रये स्वाहेति षट्। ततः आद्याराज्यभागौ च। ततः प्रजापतये। इं
द्राय। अग्नये सोमाय चाज्यं हुत्वा अग्नये रुद्राय शर्वाय पशुपतये उग्राय अशनये भवाय महादे
वाय ईशानाय च पायसं हुत्वा पूष्णे स्वाहेति पिष्टचरुं हुत्वा द्वयोः। स्विष्टकृतं हुत्वा जेनस्रा जापत्यं
ततो नवाहुती हुत्वा उत्सृष्टव्यश्च तत्रो द्वे एकां वा अस्सतरीमलंकुर्यात्। अत्र होमस्य वेदमंत्रैरुक्तेः

219/195

वृ० के होमो नेति मदनपालः॥ अन्ये तु नाम्नाकृः॥ ततो वृषमग्निं चतुः परिक्रम्य रुद्रकुंभोदके
नाभिषिच्य वृषगात्रं गंधमाल्यं कृत्वा अलंकृत्य रुद्ररूपं विभाव्य तस्य दक्षिणे मानं गंधं च
चतुर्मोदं दत्वा रुद्ररूपमेतत्पिबिमे स्पष्टला पामांत्रानि दत्वा वृषोत्सर्गश्राद्धप्रतिष्ठार्थं द
क्षिणां दत्वा वृषपृष्ठे पिंडान्दद्यादिति केचित्। ततो वामांगे त्रिशूलेन दक्षिणे चक्रेण अंकयेत्
न वा। वृषंगाश्चांकयित्वा कुशतिलहेमजलं हेमजलपूतं पुच्छमादाय प्रदेशकालावुक्त्वा काश्य
पगोत्रस्यास्मत्पितुरमुकप्रेतत्वायोत्सृजामि। युष्मं संपतिं दद्याम्येतेन पतिना संछंदं चरत तेन
श्रीरुद्रः प्रीयतामित्युक्त्वा अपसव्येन सतिलं पुच्छोदकमादायामुकप्रेतः इदं ते वृषवत्सतर्योः पु
च्छोदकमुपतिष्ठतामित्युक्त्वा अपवेत। धर्मस्त्वं वृषरूपेण जगदानंदकारकः। अष्टमूर्तेरधिष्ठा
नमतः पाहि सनातन॥ वृषो हि भगवान्धर्मश्चतुष्पादः प्रकीर्तितः। वृणोमि तमहं भक्त्या मे तं
स्वर्गं नय संततं। अयं हि वो मया दत्तः सर्वासां पतिरुत्तमः। तुभ्यं चैता मया दत्ताः पत्न्यः सर्वा मनो

शू.५०
९९

रमाः॥ऋषयएवमयादत्तस्तंतारयतु सर्वदा॥ब्राह्मणेभ्यःपूर्णपात्रमाचार्याय सहिरण्यंगोमिथु
नंदत्वाविसर्जयेत्सूर्यार्पणंकुर्यात्॥इतिवृषोत्सर्गः॥ततोनवश्राद्धवत्धरकेवाद्यश्वस्तदेशे
नाष्टेविकेंवाविप्रमिसेवेवमुश्राद्धमेकादशाहमएकस्मैवा१६गणेभ्यःश्राद्धंविषमश्राद्धंचकृत्वाच
म्परेद्याकालेस्मत्वाताकाश्यपगोत्रस्मास्मत्पितुरमुकप्रेतत्वनिरस्तावस्त्रादिरूपप्राप्त्यर्थम्
द्यश्राद्धमेकादशेह्नेकोदिष्टविधिनाकरिष्येइत्युक्ताद्यश्राद्धमुकप्रेतस्थानेक्षणःकर्त्तव्यःत।
थाप्राप्नोतुभवान्प्राप्नवानि।इमेकादशेकंवाविप्रंनिमंत्र्यक्रोधनेःशौचपरैरित्युक्तःरर्भकुंया
निमंत्र्यसर्वंनवश्राद्धंतुपार्वणवत्कार्यं॥तत्रहारिहंत्रमंडलंकृत्वाचम्याम्यर्च्यामुकप्रेतेनत्वं
पाद्यमुपतिष्ठतामित्येवंपाद्यंदत्वाचम्योरदंमुखमुपवेश्यामुकप्रेतामुकगोत्रैषतेगंधःपुष्पा
णिधूपोदीपःश्राच्छादनंवस्त्रालंकारादिवोपतिष्ठतां॥संपूर्णतांवाचयित्वाग्नौकरणंनेतिबृह
वःगृह्यतामुपमतेतवस्ति।तदामुकप्रेतायस्वाहेत्यामेनैकाहुतिः॥ततःसोदकुंभमामान्त्रंसो

221
195

पस्करममुकप्रेतायाद्यश्राद्धेउपतिष्ठतां॥विकिरेनिकस्य॥ततोवेद्यांरेखांकृत्वाउच्छिष्टपिंडे
चुदेपिंडासनं।अवनेजनं।अयंपिंडःप्रत्यवनेजनंपिंडपूजास्तत्र।ततःसुप्रोक्षितादिकृत्वा
गोत्रंनोवर्द्धतामित्युक्ताक्षय्योदकेदत्वादक्षिणांदत्वैकादशाहपक्षेआद्याय प्रेताक्कारवाह
नादिदद्यात्।बृहस्पतिः।प्रेतालंकारवस्त्राहिपितुर्यद्वाहनादिकं।संपूज्यगंधमाल्पेस्तुश्राद्धभो
क्रेतरर्पयेत्।ततोभिरम्यतामितिविसर्जयेत्।शेषंनवश्राद्धवत्।ततश्राद्यमासिकंकुर्या
त्।तत्समभ्नतेत्राणिषोडशश्राद्धानिका॥आद्याश्राद्धिकमपातेके।अत्रपदार्थमुक्तेदेवज्ञानी
येगारुडेएकादशाहेप्रत्कम्पतरक्तिदीपतेसर्वेहारदशाहेविशेषतः॥यद्यनिसंचित्सत्सविरि
शानित्रयोदशा॥याद्दातिमनस्येहर्जीवन्नप्याह्नरेतवेसुखीस्त्वाम्हगमार्गेवैनेतेयसगच्छ
ति॥श्रासनोपानहौच्छत्रंमुद्रिकाचकमंडलुः॥भाजनंभाजनाधारोवृत्त्याष्टविधंपदं॥तथाभा
जनासनस्थानेममुद्रिकाभोजनेनच।श्राजसयक्षेपबीतनपदंसंपूर्णतांव्रजेत्।महिषीरथगोदा

शृ.कृ० १००

नासुखी भवति निश्चितं॥ सर्वोपस्कारयुक्तानि परान्यत्र यो दद्या॥ यो ददाति मनस्येद्रजीवन्न
प्यात्महेतवे॥ स गच्छति परं स्थानं महाकष्टविवर्जितः॥ त्रयोदशपदानीत्थं प्रोक्तान्येकादशेऽहनि
॥ दानयानि पथ्याशक्तितेनासौ प्रीणितो भवेत्॥ अन्नं चैवोदकं चैवोपानहौ चक्रमण्डलुः॥ छत्रं व
स्त्रं तथा यष्टिं लोहदंडं तथाष्टमं॥ अग्नीष्टकां चरीं पंचतिलान्ताम्बूलमेव च॥ चंदनं पुष्पदानं
चोपदानानि चतुर्दश॥ यो भूरथं गजं वापि ब्रह्मणे प्रतिपादयेत्॥ स्वमहिम्नोनुसारेण तत्र
सुखमवाप्नुयात्॥ अत्र तत्तद्दानमंत्रमच्छते दानकमलाकरे ज्ञेयाः॥ अत्र मज्जतु विंसं॥ अ
थ शय्यादानं हेमाद्रौ भविष्ये॥ तस्मात्तु पांसमासाद्य सारदारुमयीं दृढां॥ दंतपत्रचितां रम्यां हे
मपट्टैरलंकृतां॥ हंसतूलीप्रतिच्छन्नां शुभगंडोपधानिकां॥ प्रच्छादनपटीयुक्तां गंधधूपाधिवा
सितां॥ तस्यां संस्थापयेद्धैमं हरिं लक्ष्म्या समन्वितं॥ अन्यं हरिस्थाने प्रेतं उच्छीर्षके घृतकलशं १०
जलपात्रं परिकल्पयेत्॥ विज्ञेयः पादुकाश्रेष्ठ सनिद्राकलशो बुधैः॥ ताम्बूलं कुंकुमाक्षोदकर्पूरागरु

223/1951

चंदनं दीपिकोपानहच्छत्रचामरासनभाजनं॥ पार्श्वेषु स्थापयेद्भक्त्या सप्तधान्यानि
चैव हि॥ शयनस्थस्य भवति यदन्यदुपस्कारकं॥ भृंगारकरकाद्यं तु पंचवर्णवितानकं॥ अत्र
स्तु॥ प्रयानकृच्छ्रायनं कृत्संस्कारजातया॥ शय्यामम माध्यभूत्या तु तथा जन्मनि जन्मनि॥ अस्मा
दृष्टुं सन्मयनेके त्राव स्मात्रि वस्य च॥ अर्हं तद्देवाद्दैवं तस्य सकलं प्रणिपत्य विसर्जयेत्॥ एकाद
शाहे पितथा विधिरेष प्रकीर्तितः॥ विशेषं चात्र एजैकदथ्यमानं निशामय॥ तिनो भर्तुक्रेप
किंचिद्वस्त्रवाहनभाजनं यच्चादिष्टं च तस्यासीत्तत्सर्वं परिकल्पयेत्॥ तमेव पुरुषं हैमं तां
स्यां संस्थापयेत्सदा॥ पूजयित्वा प्रदातव्या मृतशय्या यथोदिता॥ अत्रैव पाद्मे मृतकांते
स्थिती येक्रियाः शय्यादानस्य लक्षणं॥ कांचनं पुरुषं तद्वत्फलवस्त्रसमन्वितं॥ संपूज्य द्विज
दांपत्यं नानाभरणभूषितं॥ उपवेश्य तु शय्यायां मधुपर्कं ततो वदेत्॥ रजतस्य तु पात्रेण द
धिदुग्धसमन्वितं॥ अस्थि ललाटादिकं गृह्य सूक्ष्मं कृत्वा तु पायसं॥ भोजयेद्द्विजदांपत्यं वि

धिरेष सनातनः ॥ एष एव विधिर्दृष्टः पार्वतीयैर्द्विजोत्तमैः ॥ एतन्मतेऽपि प्रेतत्वे दत्ता यांतु त
स्यां वै पुनः संस्कारमर्हति ॥ भविष्ये ॥ स्वर्गे पुरंदरपुरे सूर्यपुत्रालये तथा ॥ सुखं वसति सो जंतुः श
य्याप्रदानप्रभावतः ॥ आभूतसंप्लवं यावत्तिष्ठत्यातंकवर्जितः ॥ इति शय्यादानं ॥ क्रियानिबंधे स्मृ
त्यंतरे ॥ सूतके मृतके चैव द्वितीयं मृतकं यदि ॥ पिंडदानं प्रकुर्वीत तद्दोषो न गतिर्भवेत् ॥ अहन्यागत
कं कर्म द्वादशे वैकादशाहिकं ॥ शुद्धो वा यदि वाशुद्धः कुर्यादेवाविचारयन् ॥ अथोदकुंभः ॥ हेमाद्रौ स्मृ
तिसमुच्चये ॥ एकादशाहात्प्रभृति घटस्तोयान्नसंयुतः ॥ दिने दिने प्रदातव्यो यावत्संवत्सरं सु
तैः ॥ भट्टनारायणे गौतमः ॥ प्रदद्यात्पार्वणश्राद्धं सोदकुंभमधर्मकं ॥ कुर्यात्प्रत्याब्दिकं श्राद्धं संकल्प
विधिनान्वहं ॥ अत्र पिंडे विकल्पः ॥ अहरहरन्नमस्मै ब्राह्मणायोदकुंभं च दद्यात् पिंडमप्येके नि
पृणंतीति हेमाद्रौ पारस्करोक्तेः ॥ विशेषो निर्णयसिंधौ ज्ञेयः ॥ देवजानीये गारुडे प्रत्यहं दीपको देयो रा
मार्गे तु विषमे नरैः ॥ यावत्संवत्सरं वापि प्रेतस्य सुखलिप्सया ॥ कुर्याच्छ्राद्धममुं वै पित्र्ये श्राद्धैः संकल्प्य १०१

225
1951

सुस्थितं ॥ अथ मासिकानि ॥ तानि च कृतेऽपि सपिंडीकरणेऽनंतरं पुनः कार्याणि स्युः येषां संवत्सरादर्वा
क्सपिंडीकरणं कृतं ॥ मासिकं चोदकुंभं च दद्यात्तस्यापि वत्सरमिति नैवोक्तं ॥ सपिंडीकरणा
दर्वाग् पक्षे कृतान्यपि पुनरप्यपकृष्यंते च उत्तरनिषेधनादिति गालवोक्तेः ॥ मासि मासि सपिं
डनात् प्रागेकोद्दिष्टविधिनोर्ध्वं तु पार्वणेन कार्याणीत्यादि निर्णयसिंधौ ज्ञेयं ॥ तान्याह कात्या
यनः ॥ द्वादश प्रतिमास्यानि आद्यं षाण्मासिके तथा ॥ सपिंडीकरणं चैव इत्येतच्छ्राद्धषोडशं ॥ त्रि
पक्षिकाब्दिके चेति आद्यान्येतानि षोडशेति ॥ जातूकर्ण्यः ॥ आद्यमूनमासिकं षाण्मासिकं त्वून
षष्ठं आब्दिकं मूनाब्दिकं तेनामुकदासमेतत्वनिष्ठस्यापि प्रेतलोकप्राप्त्यर्थमाद्यमासिकं द्वितीयं त्रैप
क्षिकं तृतीयं चतुर्थं पंचमं षष्ठं ऊनषष्ठं सप्तमं नवमं एकादशं द्वादशं ऊनाब्दिकानि श्राद्धा
नि स्वकालकर्तव्यानि सपिंडीकरणाधिकारसिद्ध्यर्थमेकादशेऽह्न्यपकृष्य करिष्ये इत्युक्त्वा
द्यमासिके संतेक्षण उपनिष्टनामित्येवं षोडशाविमानकुर्वाणदूर्वानिधायाद्यमासिके इदं तेपा

श्रा.प्र. १०२

द्यत्यमिकैसेवसर्वं नवश्राद्धं कृत्वा षोडशमासान्तःपिंडितं श्राद्धं स्यात्। अथ सपिंडनं। न विष्णो
द्वादशेऽह्नि षण्मासे त्रिपक्षे वा त्रिमासि वा। एकादशेऽर्थपूर्णे वा मंगलस्याप्युपस्थितौ। विष्णुः। मासि
कार्थवद्द्वादशाहं श्राद्धं कृत्वा त्रयोदशे कुर्यात्। मंत्रवर्जं हि शूद्राणां द्वादशेऽहनि कीर्तितं। एत
द्द्वितीयश्राद्धकारि शूद्रपरं मिसपरार्के कल्पतरौ च। आरोगो चोन्नं द्वादशाहः शुद्धादशमासिकानि कृ
त्वा द्वादशे सपिंडनं। अधिकमासे तु त्रयोदशे स्तत्रार्थः। विस्तरो निर्णयसिंधौ ज्ञेयः॥ अथ प्रयोगः॥
देशकालौ स्मृत्वा कात्यायनगोत्रस्यास्मत्पितुरमुकप्रेतस्य निवृत्त्यावस्थादिपितृलोकप्राप्त्यर्थमेको
द्दिष्टं पार्वणेन यात्मकं सपिंडीकरणश्राद्धं करिष्ये इत्युक्त्वा स्मत्पितुरमुकप्रेतस्य स्थाने क्ष
णं कृत्वा नवक्लिप्तप्रसादः कर्तव्य इत्येकं ततः सव्येन कामकालसंज्ञकविश्वेदेवस्थाने क्षणं कृत्वा हि
नावितैविदेवानंतरं वा प्रेतक्षणं। ततोऽपसव्येनास्मत्पितुः पितुरमुकशर्मणः सवसुरूपस्य स्थाने क्ष
णं कृत्वा स्मत्पितुः पितामहस्यामुकशर्मणः रुद्ररूपस्य स्थाने इत्यादि। एवमस्मत्पितुः प्र

227/1951

पितामहस्यामुकशर्मणः आदित्यरूपस्य स्थाने इत्यादि। एवं षट्विप्राः कुशबटवो वा। अक्रोधनैः
शौचपरैरिति जपः सर्वत्र। प्रेतस्थाने नवश्राद्धवत्। पित्र्ये पार्वणवत्। ततः परेद्युः संकल्प्य पुनः
क्षणादि दैवे चतुरस्रं मण्डलं कृत्वा तद्दक्षिणे प्रेतार्थं वर्तुलं त्रिकोणं वा कृत्वा क्रमेण पाद्यं दत्त्वा च म
का कामकालसंज्ञकविश्वेदेवा। समाधं प्रेतसमाधं प्रेतस्य पितृपितामहप्रपितामहानां समाद्य
छिस्यासने ष्टूपवेशयन्। वीसं बद्ध्वा प्रक्रान्तं श्राद्धकर्म करिष्ये। कुरुष्वेत्युक्ते कामकालसंज्ञका
नां विश्वेषां देवानामिदमासनं। सुखासनं। अत्रास्यतां धर्मो सिंदेवेक्षणः क्रियतां। तथा। प्राप्न
वानि। एवं द्वितीयदैवे। ततो दैवार्घ्यपात्रे संपन्नेत्युक्त्वा। कामकालसंज्ञकाविश्वान्देवान् न्नेभु
वाद यिष्ये आवाहयेत्युक्ते कामकालेभ्यो नमः। आगच्छतु महाभागा इति वा वाच्य कामकालं देवा इद
र्घमिति विमध्ययेत्वा पात्रे सुज्वल्य त्वा गंधपुष्पधूपदीपमाच्छादनेमुपतिष्ठतां। स्वासनं प्राप्नोतु भ
वानित्यादि। ततः पितुः पित्रादीनां पार्वणवदासनानि दत्त्वा चत्वार्यर्घ्यपात्राणि तत्राद्ये चत्वारि पवि

शू.द. त्राणि त्रिपुत्राणि। ततः काश्यपगोत्रामुकप्रेतैष तेर्घ उपतिष्ठतामिति दत्त्वा द्वितीये स्वाहिकाश्यपगोत्र
१०३ स्यामुकप्रेतस्य पित्रामुकदासेन वसुरूपेण सह संसृज्य स्वसामुं गच्छेति तदर्घ्यं तृतीयेवं पि
तामहेन रुद्ररूपेणेति द्वितीये। स्वप्रपितामहेनादित्यरूपेण सहेति तृतीये। ततः एष वोनुगतः प्रे
तः पितरस्तं दद्यामि वः।। शुभं भवतु ते शोषणं जायतां चिरजीविनः। इत्यनेन मंत्रेणार्घ्यसंसर्जनोत्तरं
प्रेतायार्घ्यदानमिति निमरदनपालः।। ततः प्रेतपित्रादिभ्यः यथावर्णं वदर्घ्यत्रयं दत्त्वा तु जंबुपात्रे कृ
त्वा गंधपुष्पधूपदीपाच्छादनालंकारान् प्रेताय तत्पित्रादिभ्यश्च दत्त्वा संपूर्णतां वाचयित्वा प्रे
तोपितायसमाप्यन्तिचय माकृतिरूपतिष्ठतामिति पाणौ कृत्वा तत्पित्रादिपुत्राग्नौकरणं कृत्वा दे
वे प्रेते तत्पित्रादिपुत्रामात्रानि संकल्प्योच्छिष्टपिंडं विकिरं च दत्त्वा गृहपाकात्पायसेन सक्तुभि राम
र्वा प्रेताय तत्पित्रादिभ्यः पिंडान् दत्त्वा द्वे स्वाहिकाश्यपगोत्रस्यामुकदासप्रेतस्य प्रेतत्वविमुक्त्या १०३
र्वस्वादिपितृलोकप्राप्त्यर्थं तत्पिंडं तत्पितृपितामहप्रपितामहानां काश्यपगोत्राणाममुकदा

229
1951

सानां वसुरुद्रादित्यरूपाणां पिंडैः सह संयोजयिष्ये। संयोजयेत् अमुकप्रेतपिंडं त्रेधा कृत्वैकं भा
गं मधुवाता म काश्यपगोत्रामुकप्रेत त्वेत्पिंडं तव पित्रामुकगोत्रेणामुकदासेन वसुरूपेण सह
संयुनज्मि एष ते पिंडः।। तस्मै ते स्वधा नमः। एवं द्वितीयं भागं पितामहेन रुद्ररूपेण। तृतीयं
भागं प्रपितामहेनादित्यरूपेण। ततः एष वो गतः प्रेतः इति पाराशरमंत्रमुक्त्वा प्रत्यवेजन पिंड
पूजादि कृत्वा दक्षिणां दत्त्वा दक्षिणां दत्त्वा दशदानं वैतरणीदानानि कृत्वा शेषं समापयेत्। ततः
प्रत्येयश्राद्धं कृत्वा वर्षं निं यावत् प्रत्यहमुदकुंभश्राद्धं स्वस्वकाले पुनर्मासिकानि च कुर्यात्।। इ
ति श्रीकमलाकरभट्टकृते शूद्रधर्मतत्त्वे और्ध्वदेहिकप्रयोगः।। अथ शूद्रसभा।। तत्रानुपनीत
द्विजानां शूद्रसमाः। शूद्रेणापि समस्ताः कृत्यावद्देवेन मुच्यतेऽइति मनूक्तेः। साम्यं च कर्माधि
कारमात्रेण। न तु सर्वाग्नपंचयज्ञाद्यास्ति। मां गुपनयनात् कामचारवाग्दभक्षा इति गौतमोक्तेः।
श्राद्धं तु मंत्रवर्जं वदेवानामिष्येत् स्वधानिनयनाद्यते इति मनूक्तेः। कर्मवेदः। पात्रेस्वपि

श्र.प्र.
१०४

रत्वं द्वेपि॥ अमावास्याष्टकाकृष्णपक्षपंचदशीषु च॥ एतद्वानुपनीतोपि कुर्यात्सर्वेषु पर्वसु
श्राद्धं साधारणं नाम सर्वकामफलप्रदं॥ भार्याविरहितोप्येतत्प्रवासस्थोपि नित्यशः॥ शूद्रो
प्यमंत्रवत्कुर्यादनेन विधिना बुधः॥ एवं तावत्त्रैवर्णिकपुरुषस्तु निर्णयसिद्धो श्राद्धाधिकारे तेषां त्व
द्विजस्त्रियोपि॥ तासामपि तस्या यावद्धर्माशीलत्वे च धर्मतुल्यत्वादिनिषाद्न्यायेनानधिकार
ता॥ अतस्तास्वकर्मण्येषाभिसाध्येऽधिकारोस्त्येव॥ कामश्रुतिगतस्य पुंस्त्वस्योद्देश्यविशेषणस्याष्ट
माथेन्यायेनाविवक्षितत्वात्॥ प्राणिग्रहणादिसिद्धं तं कर्मसु तथा पुण्यफलेषु चैतत्पत्नीत्वोक्तेश्च
॥ स्मृतसंहितायामपि॥ द्विजस्त्रीणामपि श्रौतस्मार्तानाम्यासेऽधिकारितास्ति इति केचिद्विद्वांसः॥ स्त्री
णां शूद्रसमानतामिति स्त्रीशूद्रास्सधर्माण इति स्मृतेश्च॥ संस्काराश्चापि शूद्रवन्मंत्रवर्ज्यं अमंत्रि राम
का तु कार्येयं स्त्रीणामावृदशेषतः इति मनूक्तेः॥ तेन अधिकारो भवेद्वा॥ सूत्रधर्मे न वैदिके इति १०४
[illegible]के बहिर्वेदि च यज्ञानंतस्यास्रिकमुदाहृतमिति व्यासोक्तेश्च शूद्रवत्तुल्यादिषोडशश्र

231/1951

द्धादानमप्यसांदिजत्वाशायोस्मर्गादावप्यधिकारः फलवाक्यगतस्य पुंस्त्वस्याप्युद्देश्यगतस्याविवक्षि
तत्वात्॥ ततः सधवानोपस्य तु अनुमत्या इष्टयागेष्वधिकारः॥ अग्निसाध्यत्वाभावात् विधवानां तु स्वात्रा
दस्त्येवाधिकारः॥ एतच्च विज्ञानेश्वरेण व्यवहाराध्याये सविस्तरमुक्तं॥ अत एव तुलादेर्पुमान्प्र
द्युम्नवत्सत्यान्नारी स्यात्पार्वती समेति स्त्रीणां फलश्रवणं॥ नन्वेवं शूद्रसधर्मत्वात्पंचयज्ञा अपि
स्त्रीणां स्युरिति चेत् शृणु॥ पंचयज्ञविधानं तु गृही नित्यं न हापयेदिति शंखवाद्युक्ते यजेतेत्यादौ
कत्रैकत्वपुंस्त्वस्यविवक्षितत्वात् स्त्रियाः॥ प्रसक्तिः॥ न चानिमेकार्यप्राप्तिरस्ति॥ येन तद्गतपुं
स्त्वाविवक्षया स्त्रिया अप्यधिकारः स्यात्॥ नित्यत्वानुपपत्त्या प्रत्यवायाभावस्य कल्प्यत्वात्॥ न च
नास्त्येन निस्त्रेऽधिकारः यथा मदनरत्नेऽलंकारे॥ प्रत्यहं तर्पणं कार्यं भर्तुः कुशतिलोदकैरिति॥ आ
द्धपितिसनैमित्तिककाम्येषु पुत्राद्यभावे स्वयं वा अधिकारः॥ भार्यापिंडं पतिर्दद्याद्भर्त्रे भार्या पति
थैव चेति शंखोक्तेः॥ अपुत्रा शयनं भर्तुः पालयंती व्रते स्थिता॥ पत्न्येव दद्यात्तत्पिंडं कृत्स्नमंशं

स्मृ.कौ०
१०५

लनेन्नवेति हृद्दमनूक्तेश्च ॥ एतन्न विस्तरं निर्णयसिंधावुक्तं । पत्रफलश्रवणं विष्णुशिवपूजना
दौ तत्राधिकारोस्त्येव ॥ एवं व्रताद्यावपि । तस्मात् छूद्रसमवेपि स्त्रीणां न पंचयज्ञाः ॥ किंतु भोजनका
ले ग्रासमात्रं घृतप्लुतमग्नौ क्षिपेत् ॥ यस्तु तेषामग्रतो त्रसिधे स्वक्षोहत्वा श्रीयाज्ञिति घष्ठी
यं शोरर्ये गोनिर्णोक्तेरितिदिक् । विस्तरा पत्ने बहुनी चपते ॥ अथ पत्नीधर्माः ॥ मनुः ॥ उत्पादनमपत्य
स्य जातस्य परिपालनं । प्रत्यहं लोकयात्रा च प्रत्यक्षं स्त्री निबंधनं ॥ अपत्यं धर्मकार्याणि सुश्रूषा
रतिरुत्तमा ॥ दाराधीनास्तथा स्वर्गः पितॄणामात्मनश्च ह ॥ तस्माद्यत्नेन रक्ष्यास्ताः नत्वेवमा
नुरब्रवीत् ॥ अस्वतंत्राः स्त्रियः कार्याः पुरुषैः स्वैर्दिवानिशं ॥ विषयेषु च सज्जंत्यः संस्थाप्या ह्यात्म
नो वशे ॥ पिता रक्षति कौमारे भर्ता रक्षति यौवने ॥ पुत्रास्तु स्थाविरे भावे न स्वातंत्र्यं क्वचित्स्त्रियाः ॥ राम
॥ सूक्ष्मेभ्योपि प्रसंगेभ्यः स्त्रियो रक्ष्या विशेषतः ॥ द्वयोर्हि कुलयोः शोकमावहेयुररक्षिताः ॥ का १०५
ले दाता पिता वाच्यो वाच्यश्चानुपयन् पतिः ॥ मृते भर्तरि पुत्रस्तु वाच्यो मातुर

रक्षिता कल्पांतरोपेवीनसि ॥ अप्रमत्ता रक्षत तं तु मेन मा परक्षेत्रे पुरबीजानि वाप्सुः ॥ भार्यां
रक्षत कौमारं बिभ्रतः परे तस्मः ॥ स्त्रियो गृहदेवतास्तासां न शोचं न व्रतं नोपवासः पतिशुश्रू
षया गच्छंति परमां गतिं ॥ व्यासः ॥ भ्रमी मांसपानि शोचानि स्त्रीषु बाल्यातुरेषु च ॥ नारदः ॥ पा
नं दुर्जनसंसर्गः पत्या च विरहोऽटनं ॥ स्वप्नोऽन्यगेहवासश्च स्त्रीणां दूषणानि षट् ॥ नै
ता रूपं परीक्षंते नासां वयसि संस्थितिः ॥ सुरूपं वा कुरूपं वा पुमानित्येव भुंजते ॥ शय्यास
नमलंकारं कामं क्रोधमनार्जवं ॥ द्रोहभावं कुचर्यां च स्त्रीभ्यो मनुरकल्पयत् ॥ नास्ति स्त्री
णां क्रिया मंत्रैरिति धर्मो व्यवस्थितः ॥ निरिंद्रिया ह्यमंत्राश्च स्त्रियोऽनृतमिति स्थितिः ॥ न कश्चि
द्योषितः शक्तः प्रसह्य परिरक्षितुं ॥ अर्थस्य संग्रहे चैनां व्यये च विनियोजयेत् ॥ शौचे धर्मे
ऽन्नपक्त्यां च पारिणाह्यस्य वेक्षणे ॥ मनुः ॥ बालया वा युवत्या वा वृद्धया वापि योषिता ॥
न स्वातंत्र्येण कर्तव्यं किंचित्कार्यं गृहेष्वपि ॥ पित्रा भर्त्रा सुतेनापि नेच्छेद्विरहमात्मनः ॥ एषां हि वि

स्मृ० रहेण स्त्री गर्हिता स्यात्कुलद्वये ॥ विष्णुः ॥ भर्तरि प्रोषिते नप्रतिकर्मक्रियापरगृहेष्वनभिग
१०६ मनं द्वारदेशगवाक्षेष्ववस्थानं ॥ याज्ञवल्क्यः ॥ यत्रानुकूल्यं दंपत्योस्त्रिवर्गस्तत्र वर्द्धते ॥ रक्षे
त्कन्यां पिता विन्नां पतिः पुत्रास्तु वार्धके ॥ अभावे ज्ञातयस्तेषां न स्वातंत्र्यं क्वचित्स्त्रियाः ॥ भर्तृभ्रा
तृपितृज्ञातिश्वश्रूश्वशुरदेवरैः ॥ बंधुभिश्च स्त्रियः पूज्या भूषणाच्छादनाशनैः ॥ संयतोपस्क
रा दक्षा हृष्टा व्ययपराङ्मुखी ॥ कुर्याच्छ्वशुरयोः पादवंदनं भर्तृतत्परा ॥ स्त्रीभिर्भर्तृवचः कार्यमेष
धर्मः परः स्त्रियाः ॥ आशुद्धेः संप्रतीक्ष्यो हि महापातकदूषितः ॥ क्रीडां शरीरसंस्कारं समाजो
त्सवदर्शनं ॥ हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृका ॥ बृहस्पतिः ॥ प्रसाधनं नृत्यगीतसमाजो
त्सवदर्शनं ॥ मांसमद्यानियोगं च न कुर्यात्प्रोषिते पतौ ॥ कल्पतरौ शंखलिखितौ ॥ प्रोषिते भ
र्तरि नैरवातोद्वविहाररचित्रदर्शनावासोद्यानगमनविलसत्तांबूलोत्कृष्टपानभोजनकंदुकक्री
डागंधमाल्यालंकारदंतधावनांजनादर्शप्रसाधनादीनामनाचरणं ॥ तत्रैव नारदे ॥ अप्रियमुक्तस्तन

स्मृ १०

रो ॥ एताः स्त्रियो नाम सत्कार्या नित्यमिच्छता ॥ लालिता निगृहीता च स्त्री श्रीर्भवति भारत ॥ मनुः ॥
यत्र नार्यस्तु पूज्यंते रमंते तत्र देवताः ॥ यत्रैतास्तु न पूज्यंते सर्वास्तत्राफलाः क्रियाः ॥ शोचंति
जामयो यत्र विनश्यत्याशु तत्कुलं ॥ न शोचंति तु यत्रैता वर्द्धते तद्धि सर्वदा ॥ तस्मादेताः स
मभ्यर्च्या भूषणाच्छादनाशनैः ॥ जामयः स्नुषा भगिन्यादयः ॥ कल्पतरौ दक्षः ॥ जलौकेव च सर्वा स्त्री
भूषणाच्छादनाशनैः ॥ सुभृतापि हृता नित्यं पुरुषं ह्यपकर्षति ॥ जलौका रक्तमादत्ते केवलं सा तप
स्विनी ॥ इतरा तु धनं वित्तं मांसं वीर्यं बलं सुखं ॥ साशंका बालभावे तु यौवनेऽभिमुखी भवेत् ॥ तृण
वन्मन्यते नारी वृद्धभावे स्वकं पतिं ॥ अपथ्यानुभवेत्पश्चाद्यथा व्याधिरुपेक्षितः ॥ मनुः ॥ विधाय वृ
त्तिं भार्यायाः प्रवसेत्कार्यवान्नरः ॥ अवृत्तिकर्शिता हि स्त्री प्रदुष्येत्स्थितिमत्यपि ॥ याज्ञवल्क्यः ॥
सत्यामन्यां सवर्णायां धर्मकार्यं न कारयेत् ॥ सवर्णासु विधौ धर्म्ये ज्येष्ठया न विनेतरा ॥ छंदो
गपरिशिष्टे ॥ अग्निशिष्टादिशुश्रूषां बहु नार्यः सवर्णया कारयेत्तद्बहुत्वे चेज्ज्येष्ठया गर्हिता

235/1951

स्मृ.रु०
१०७

नचेत्॥ यावास्माद्यौ रस्सुरासामात्ता संपारिनी चयात्॥ रक्षामिथुंवदस्मुतातामन्त्र विनियोजये
त्॥ कल्पतरौ रक्षा॥ धर्मपत्नी समाम्नाता निर्दोषा परिसानवेत्। दोषे सति न दोषः स्यात्स्म
न्मार्गुणान्विता॥ मनुः॥ संवत्सरं प्रतीक्षेत द्विषंती योषितं पतिः॥ ऊर्ध्वं संवत्सरात्त्वेनां ह
त्वा तां तु न संवसेत्॥ अतिक्रामेत्प्रमत्तं वा मत्तं रोगार्त्तमेव वा॥ सा त्रीन्मासान्परित्याज्या वि
भूषणपरिच्छदा॥ उन्मत्तं पतितं क्लीबमबीजं पापरोगिणं। न त्यागोस्ति द्विषंत्याश्च न च दायापव
र्त्तनं॥ मनुकात्यायनौ॥ विशीलः कामवृत्तो वा गुणैर्वा परिवर्जितः। उपचर्यः स्त्रिया साध्व्या सततं
देववत्पतिः॥ नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणं। पतिं शुश्रूषते येन तेन स्वर्गे महीय
ते॥ पत्यौ जीवति या नारी उपोष्य व्रतचारिणी॥ आयुष्यं हरते भर्तुर्नरकं चैव गच्छति॥ कल्पत
रौ हारीतः॥ न प्रोषिते त्वलंकुर्यान्न वेणीं प्रमुचेत्॥ मदनं रत्ने संप्रोक्षे प्रसुप्तं च सुखासीनं रमणं एम-
परिच्छया॥ आतुरे पतिकार्येषु पतिनात्यापयेत्कचित्॥ रजोवती त्रिरात्रं ... मुखेनैव द १०७

237
1951

र्शयेत्॥ स्ववाक्यमाश्रयेत्त्वा प्रियाभ्यां ज्ञातान स्पृशेत्॥ सुप्ता तानन्तर्वस्त्र नग्नो सिञ्चात्समर्पयेत्
चित्॥ अथवा मन्त्रसिध्यात्या पतिं नानुविलोकयेत्॥ हरिद्रां कुंकुमं चैव सिंदूरं कज्जलं तथा॥ कूर्पा
सकं च तांबूलं मंगल्याभरणं शुभं॥ केशसंस्कारकबरीकरकर्णविभूषणं॥ भर्तुरायुष्यमिच्छंती
दूरयेन्न कदाचन॥ न च दुर्जनयानाय मित्रत्वं कुरुते शुभा॥ न द्वेषिणी स्त्री नारीं न संभाषेत क
र्हिचित्॥ नैकाकिनी क्वचिद्यायान्नग्ना स्नायान्न वै क्वचित्॥ नोलूखले न मुसले न वर्द्धन्यां सो
दृषद्यपि॥ न यंत्रकेन देहल्यां सदैवोपविशेत्क्वचित्॥ अन्यत्र तु रहस्यार्थानारोपितस्वरा
ज्ञा श्वनां जा पतेग्रामेग्रगाजीनिर्जने वने॥ अपवादेन वृक्षकाकलहं दूरतस्त्यजेत्॥ गुरूणां सं
निधौ चापि नोच्चैर्वाक्यान्न वा हसेत्॥ ताडिता ताडितु येच्छेत्साध्वी दीपदंशिका॥ न नारी या
समुत्सृज्य मिश्रमश्नाति केवलं॥ ग्रामे सा शूकरी वा स्यादृभी वा स्वविड्भुजा॥ कल्पतरौ यमः॥ ऋ
तुस्नातां तु या नारी भर्त्तारं नोपसर्पति॥ सा ग्राममध्ये विख्याप्य भ्रूणघ्नीं तु विवासयेत्॥ बोधा

स्मृ०च०
१०८

पत्न॥ अप्रशुश्रूषाकरीं चां धर्मबंधकां परिहिंसकां॥ त्यजंति पुरुषाः प्राज्ञाः सद्यस्त्वप्रियवादि
नीं॥ अप्रजां दशमे वर्षे स्त्रीप्रजां द्वादशे त्यजेत्। मृतप्रजां पंचदशे सद्यस्त्वप्रियवादिनीं॥ व
सिष्ठः॥ व्यवाये तीर्थगमने धर्मेभ्यस्तु निवर्त्तते। चत्वारो व्यभिचारा। तीर्थेषोनि। हारितश्च
नधान्यक्षयकरीं च वर्जयेत्। नारदः॥ व्यभिचारे स्त्रिया मौंड्यमधःशयनमेव च। कदन्नं च कुवा
सश्च कर्म चावस्करोज्झनं॥ शंखः॥ नानुक्त्वा गृहान्निर्गच्छेन्नागच्छेन्नानुत्तरीया न त्वरितं व्रजेन्न परपु
रुषं संभाषेत तन्न स्मितं दर्शयेदागुल्फाद्वासः परिदध्यान्न स्तनौ विवृतौ कुर्यान्न हसेदपावृतं न भर्त्रा
रेण द्विष्ट्वा धूर्त्ताद्भिक्षुण्या न गणिकाधूर्त्ताभिसारिणी सहैकत्र तिष्ठेत्। संकोचे। यामि पंसीए पेत्नीनास्त्रिलो
का प्राणिनां तया। भुक्ते भुक्ते तथा पत्नी तस्मिंस्तिष्ठति तिष्ठति। निद्रिते च विनिद्राति प्रथमं परिबु
ध्यते। अनलंकृतमात्मानं पत्युर्नो दर्शयेत् क्वचित्। कार्यार्थं प्रोषिते पत्यौ सर्वमंडनवर्जिता॥ न
तन्नामग्रहण या तन्मा पुष्पविहृद्ये। आकुष्टापि न चाक्रोशेत्ताडितापि प्रसीदति। छंस्कुरुः

239
1951

ते स्वामिन्नस्मतामिति वक्तिर्च॥ आहूता गृहकार्याणि त्यक्त्वा गच्छति सत्वरं। पत्नी पकुरणं स
र्वं मृत्सुसंशोधयेत् स्वयं। नियमोदकवर्ह्यांश्च पत्रपुष्पादिकं चयेत्। सेवेत भर्त्तुरुच्छिष्टमिष्ट
मन्नफलादिकं। महाप्रसाद इत्युक्त्वा पतिदत्तं प्रतीच्छति। कल्पतरौ स्मृतं॥ गृहमेधा च वेत्रिलंम
ष एषा नित्यं पूजयेत्तु गृहकार्यपरा। पूजयेत् मार्जयेत्। नित्यस्नानकृता वेणी पूजयेत् पुष्पवास
सा। एवमेव रहो गच्छेत्पादेव न्यास प्रबुध्यते। देवताराधनं कुर्याद्धूपपुष्पबलिं हरेत्। त्रां रवलि
स्विते। वेश्मानुत्तरवेगंधमाल्यामरणानि विहृतानि वासांसि विनिपातान्न परपुरुषमभिभाषेतान्य
त्र वणिक्प्रव्रजितवृद्धेभ्यः॥ हारीतः॥ स्नाताप्युक्तेवाससी परिधायदेवागारं प्रविश्य पनेमस्कृत्य
न्ना द्याभिघार्य तत्र कृते देवेभ्य उदाहृत्यो देवपत्नीभ्यो कृत्वा बलिं हरेच्छुते देवातिथ्येयथास्वग
हिण्यस्तपयित्वा शेषं पत्नी गुरुनेनुक्त्वा भांडानि निर्णिज्य प्रक्षाल्य बहिरन्तर पूर्वस्यां दिशि वास्तु
पतिरूतन पतये रूपाय नमः इतिनि यै वेसा पंस्नेताहि यथार्थसंविष्टे पुनः सा प्र० नवतेरुहाय न

स्मृ० स्मसरेत्स्मनारक्षां कुर्योन्मतिभस्मना॥ द्वारमपिधाय स्वामिसुताडिता नात्मानं चाक्लमेतु पुनः॥ आम्
१०९ दक्षं स्यान्न तत्स्मना स्वर्गारिस्पर्शः॥ आनमस्मन्न्हपारौ तवि शेषो प्रविष्टा स्थितनोर्ध्वं नैवित
र्कस्यान्नेनाम्नो भवस्वामी क्षेत॥ परिमज्य संवाहयित्वोयाती मध्यजनेन नोक्षेत्वर्षधर्मभोस्वगात्रे
भ्यः परिमज्या स्वामांतरगते नारायणाक्रांते न्त्यायानमुद्दाछेदः स्वमना सूर्येणार्चयेत्॥ तथा परत्रा
यनाक्तन्नवस्त्राभरणानि मन्त्रस्यापि नाधमवस्रो॥ न थेकपात्रं भयमंसोस्थिद्यतिर्मत्स्यं चान्यत्र गु
रुभर्तृस्तुतेभ्यः इतिरक्तांदे॥ तार्थस्नानार्थिनी नारी पतिपादोदकं पिबेत्॥ शंकरादपि विष्णोर्वा
पतिरेको धिकः स्त्रियः॥ पुरस्ताद्रामभनाधिरत्नावल्या चस्कांदे॥ प्रातः कालेतु यानारी रहस्यार्घ्यं
विवस्वते॥ सप्तजन्मानि वैधव्यं सा नारी नैव पश्यति॥ हस्ताद्रतुमंडलं बाह्येस्वर्पितत्वाक्षतादिभिः॥
एज्येत्तनतयाचेतस्यास्तुष्यंति देवताः॥ प्रातःकालेतु यानारी शुचिर्भूत्वा समाहिता पूजयेद्धा राम १०९
दुरस्त्रींस्तु सर्वान्कामानवाप्नुते॥ न ददाति यदा नारी सजोशयैप्रसहं बलिं॥ सोनाम्बेव पथाक्रि

241/1951

सामेस्मरकं व्रजेत्॥ अवरूपमेव नारीणि ज्योतिशायार्क्सि कर्मणि॥ मीलनं प्रसरं कार्यपुत्रपौत्रध
नेप्सुभिः॥ कश्यत रोमारते॥ यदेवभर्त्राजानीयान्मंत्रमलयरां स्त्रियं॥ उद्विजेत्तद्देवास्याः सर्पा
दिवसमगतादिव॥ तत्रैव विष्णूक्तं स्वर्थं प्रतिश्रीवाक्यं॥ नारीषु नित्यं शुचिन्नषितासुसर्वेन्न क्रमिपु
पाशिनीषु॥ आमुक्तहस्तासु सुताक्षितासु सुगुप्तचांडासु बलिप्रियासु॥ सुमृष्टवेश्मासु जितें
द्रियासु कलिप्रपेतासु विलोलुपासु॥ धर्म्मव्यपेक्षासु रयान्वितासु स्थितास्तदाहं जगतां विधा
त्रि॥ व्यासः॥ द्वारोपवेशनं नित्यं गवाक्षेण निरीक्षणं॥ असत्प्रलापे हास्यं च दूषणं कुलयोषितां
भारते॥ अदृश्यालाजनपदाः शिवशूला ऋतुष्पथाः॥ वनिताः केशशूलिन्यो न विष्यंति कलौ युगे॥ अ
स्याः धर्म्मांहपरशुरामः॥ अदृमं त्रितिमोवेदः श्लोकविक्रयणकय केशाश्च नगमिसाकुर्वेद्तत्वार्यद
न्निनिः॥ मनुः॥ भर्त्राहीवं गुरुर्न्नेत्राधर्मतोर्यचिताश्चितानि च॥ तस्मात्सर्वं परित्यज्य पतिमेकं समर्चयेत्॥ नु
केनु केपतीयातुत्यासीतानत्या पिबासितेत्॥ विनिंदितेविनिंदातिमा स्त्री ज्ञेया पतिव्रता॥ अंगिराः॥ अ

श्र.५०
११०

नार्त्ते मुदिते हृष्टा प्रोषिते मलिना कृशा। मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता॥ रजोवृत्ता गर्भि-
णी धर्मा सहगमनानधिकारो हरणशौ निर्णयो विधिश्च निर्णयसिंधावुक्तो स्माभिः। अथ विधवाध-
र्माः। मदनरत्ने पारिजाते च। स्कांदे। पत्यौ मृते पि या योषिद्वैधव्यं पालयेत्क्वचित्। सा पुनः प्राप्य
भर्तारं स्वर्गभोगान् समश्नुते। विधवा कबरीबंधो भर्तृबंधाय जायते। शिरसो वपनं तस्मात्कार्यं
विधवया सदा। एकाहारः सदा कार्यो न द्वितीयः कदाचन। त्रिरात्रं पंचरात्रं वा पक्षव्रतमथापि
वा। मासोपवासं वा कुर्याच्चांद्रायणमथापि वा। कृच्छ्रं पराकं वा कुर्यात्तप्तकृच्छ्रमथापि वा। यवान्नेन
फलाहारैः शाकाहारैः पयोव्रतैः। प्राणयात्रां प्रकुर्वीत यावत्प्राणः स्वयं व्रजेत्। पर्यंकशायिनी
नारी विधवा पातयेत्पतिं। तस्माद्भूशयनं कार्यं पतिसौख्यसमीहया। नैवांगोद्वर्तनं कार्यं स्त्रिया
विधवया क्वचित्। गंधद्रव्यस्य संयोगो नैव कार्यस्तया पुनः। तर्पणं प्रत्यहं कार्यं भर्तुः कुशतिलोदकैः रा.म०
॥ तत्पितुस्तत्पितुश्चापि नामगोत्रादिपूर्वकं। इदं पुत्राद्यभावे। विष्णोस्तु पूजनं कार्यं पतिबुद्ध्या नचा- ११०

243
1959

न्यथा। पतिमेव सदा ध्यायेद्विष्णुरूपधरं परं। यद्यदिष्टतमं लोके यच्च पत्युः समीहितं। तत्तद्गुणवते
देयं पतिप्रीणनकाम्यया। वैशाखे कार्त्तिके माघे विशेषनियमं चरेत्। स्नानं दानं तीर्थयात्रां वि-
ष्णोर्नामग्रहं मुहुः। वैशाखे जलकुंभाश्च कार्त्तिके घृतदीपकाः। माघे तिलैर्धनोत्सर्गः स्वर्गलोके
विशिष्यते। प्रपा कार्या च वैशाखे देवे देया गलंतिका। उपानद्व्यजनच्छत्रसूक्ष्मवासांसि चंदनं
देयानि द्विजमुख्येभ्यः प्रीतिर्मे मतामिति। एवं विधेश्च विधवाविधेर्नियमैर्व्रतैः। वैशाखका-
र्त्तिकमाघानेवमेवातिवाहयेत्। नाधिरोहेदनड्वाहं प्राणैः कंठगतैरपि। कंचुकं न परीदध्या-
द्वासो न विकृतं वसेत्। एवं धर्मसमायुक्ता विधवापि पतिव्रता। पतिलोकमवाप्नोति न भवेत्क्वापि
दुःखिनी। श्राद्धं च षट्पिंडकं कार्यं स्वभर्तृप्रभृतित्रिभ्यः स्वपितृभ्यस्तथैव च। विधवा कारये-
त् श्राद्धं यथाकालमतंद्रिता। तिस्रस्तिस्रो वत्स्यांर्द्धमनन्तकैः सुव्रतानां। तासां तुल्यो। काः पति-
भिः समानाः गोभा पुंजो काव्यभिचारिणीनां। हारीतः। पतिव्रता तु साध्वी या निष्ठा यातिम नो

स्मृ.द०
१११

मते॥ साहित्वा सर्वपापानि पतितो लोकसंग्रहानुपात्। बृहस्पतिः। व्रतोपवासनिरता ब्रह्मचर्येव्य
वस्थिता। दमदाननरता नित्यमपुत्रापि दिवं व्रजेत्। मनुः। कामं तु क्षपयेद्देहं पुष्पमूलफलैः शु
भैः॥ न तु नामापि गृह्णीयात् पत्यौ प्रेते परस्य तु। मनुयमौ। आसीता मरणात् क्षान्ता नियता ब्रह्म
चारिणी। यो धर्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम्॥ स्त्रियाः। अक्रतोर्वा नाग्नौ स्नेवा मनुज्ञानाभिधावते। प्रजा
हितस्याः स्त्रीधर्मः सवर्णे हिति धारणम्। अष्टाशीतिसहस्राणि मुनीनामूर्ध्वरेतसाम्। दिवं गतानि
विप्राणामकृत्वा कुलसन्ततिम्। मृते भर्तरि या नारी ब्रह्मचर्ये व्यवस्थिता। स्वर्गं गच्छत्यपुत्रापि य
था ते ब्रह्मचारिणः। स्त्रीरेः। अदृष्टा तु सुतां किञ्चित् कुर्यात् स्वर्गं तस्य सा। इति विधवाधर्माः। तथा
कुण्डगोलकावपि शूद्रसमौ। तथा च स्मृतिकौमुद्यां देवलः। द्वितीये न तु पत्यौ। पित्रा सवर्णायां
प्रजापतेः सवर्णो ह इति ज्ञेयः। शूद्रधर्मा च जातितः। अन्तर्हीनास्त्वसंस्काराः सवर्णा स्वपि
पुत्राः। जग्मारिताः सवर्णे नत्वात्मा इति बहिष्कृताः इति। तौ ताह मनुः। परदारेषु जायेते द्वौ

राम
१११

245/1951

सुतौ कुण्डगोलकौ। अमृते जारजः कुण्डो मृते भर्तरि गोलकः॥ न तु कुण्डगोलकयोर्ब्राह्मण
लिकत्यं श्राद्धे निषेधः। स हि ब्राह्मणः श्राद्धसंपदे इत्युक्ते ब्राह्मणमात्रप्राप्तौ तेषां मध्ये केषां
चिन्निषेधार्थः। यदाह याज्ञवल्क्यः। रोगी हीनातिरिक्ताङ्गः काणः पौनर्भवस्तथा। अवकीर्णी कु
ण्डगोलौ कुनखी श्यावदन्तकः इति। तयोश्च ब्राह्मण्ये प्रमाणाभावान्निषेधोऽव्यर्थः। तथा स्मृत्यर्थसा
रे ब्राह्मणे च तयोः संस्कार्यत्वमुक्तं। केचित्तु शूद्रे जातौ संस्कार्यौ कुण्डगोलकाविति तदपि न युक्तमि
त्युक्तमेतौ ब्राह्मण्येन ब्राह्मणजातौ ब्राह्मणा इति क्रमप्राप्तस्य श्राद्धे निषेध इति विज्ञानेश्वरः। कु
ण्डगोलकयोः संस्कार्यत्वं श्राद्धे निषेधश्च क्षेत्रजपरः। सा स्यादनुज्ञाता। अपरस्मा ब्राह्मणत्वे
न प्रमाणाभावादुपधियसंकरेषु पाधीरसंकरादिसपरार्कः। कल्पतरौ कात्यायनः। सुखार्थं यापि
हि कात्ली न भर्तुः सुतकाम्यया। पुत्रं तु जनयेद्देवं निद्याप पापा च सा स्मृता। भर्तृगोत्रसमुत्पन्न
नारी यद्यन्यमाश्रयेत। निन्द्यैव सा स्मृता लोके परपूर्वेति चोच्यते। परपूर्वा तु यत्रास्या तत्रस्यान्न

शू.का०
११२

श्रितः मनुः॥ क्षेत्रे परहेतेषु धर्मोयं लब्धा वा स्वामिनोऽन्वितः॥ निरोद्धव्या च ताः स्नात्वा परपूर्वाः पराध
नः॥ चौरहस्तात्तदारी वेगाद्दुर्भिक्षाद्देशविभ्रमात्॥ निष्कार्यदा संकोना रागद्वेषात्स्वेच्छया क्रमाग
ता॥ स्त्रा संतानोगे न दोषः स्यादिति चान्यत्र विनिश्चयः॥ स्वामिरक्तानुरक्ता हीयाद्देया चेत्तत्वतो न्य
था॥ हीयमान पयाश्चान्ने पानारी नानुमोदते॥ न साहेया न च ग्राह्या विधिरेष स्मृतो बुधैः॥
न चोत्तमां न चाकामां तथा पुत्रवतीं न च॥ ईदृशीं तनुरूपेण निष्क्रयेण प्रमीलयेत्॥ यमः॥ जार
जातः सवर्णायां कुंडो जीवति भर्तरि॥ मृते गोलकनामा तु जातिहीनो च तत्स्मृतो॥ असवर्णासु
नारीषु द्विजैरुत्पादितास्तु ये॥ परपत्नीषु सर्वासु कुंडास्ते गोलकाः स्मृताः॥ मातृवर्णा न ते प्रोक्ताः
पितृवर्णा न च स्मृताः॥ अविवाह्याः सुतास्तेषां बंधुभिः पितृमातृतः॥ स एव॥ ऊढ्वा सांतपनं कु
र्याद्वत्वा संकीर्णयोनिजं॥ मृते हत्वा तिष्ठद्भूतु कुंडं गोलकमेव च॥ मनुः॥ जातो नार्यामनार्यायां
मार्यादार्यो भवेद्गुणैः॥ जातोप्यनार्यादार्यायामनार्य इति निश्चयः॥ नीचायामुत्तमजो संस्कार्यो रा.म.
११२

247/1951

उत्तमामानीचजो नेत्यर्थः॥ स्मृतिकौमुद्यां माधवीये पुराणे॥ सवर्णासु सवर्णेभ्यस्तु ये जायंते परै
रपि॥ अवरोधक संज्ञास्ते व्रतसंस्कारवर्जिताः॥ विप्रायां विप्रजा उपनेया नान्ये इति तंत्रे वो
क्तं॥ चातुर्वर्ण्यमपि वर्णानां जीवतामन्यसंभवः॥ कुंडस्तु संकरो ज्ञेयो मृतानां मध्यगोलकः॥ जा
तिहीनः समाचरणं ग्राह्ययेत्कर्मनामनी॥ तदीयकर्मनाम च तन्मातृणामपी सर्वः॥ योऽन्यो
देवपुरे राज्ञा वर्णसंकरमीरुणा॥ देवपुरे देवधाक्षारे॥ कुंडो वा गोलको विप्रः संध्योपासनमा
त्रवित्॥ स्नानतो जनसंध्यासु देवेषु सपवेश्चनता॥ विप्र इत्युक्ते स्तज्जसौ वसंध्योपनयनं च
॥मिताक्षरायामपि कुंडगोलकौ यथार्हं संस्कार्याविति युक्तं॥ स्मृत्यर्थसारे प्रयोगपारिजा
ते ब्राह्मे च॥ अत्रापि च द्विजैर्जातौ संस्कार्यौ कुंडगोलकौ॥ विति॥ स्नानेति॥ ला नारदिसमयेवरि
चरहो कंचुप चेति सर्वाः॥ इति कुंडगोलकौ॥ तथा द्विजोत्पन्नः पुंडोपि शूद्रसमः॥ वसंते ब्राह्मण
मुपनयीत त्सुपनयनविधौ वसमाप्य पुर्वद्दुपादेयत्वेन विवाक्षि न पुंस्त्वाश्राणामि वक्तस्यायु

श्रू.५०
११३

पनयनाभावात्॥ अष्टवर्षवाक्ये तु दृढेरपत्येपि प्राप्तानुवादेन पुंस एवानुवादात्॥ मिताक्षरायां
देवलोपि॥ पंडको लिंगहीनः स्यात् संस्कारार्हश्च नैव स इति॥ अत एव तत्रैव षंढमनुः॥ षंढं तु
ब्राह्मणं हत्वा शूद्रहत्याव्रतं चरेदिति बौधायनसूत्रे स्मृत्यर्थसारे च वचनादुपनयनमुक्तं
॥ प्रयोगपारिजाते ब्राह्मेपि॥ ब्राह्म एवं ब्राह्मणाज्जातो ब्राह्मणः स इति श्रुतिः॥ तस्मात् षंढबधि
रकुब्जवामनपंगुषु॥ इत्याद्युक्त्वा ध्वस्तपुंस्त्वेषु चैतेषु संस्काराः स्युर्यथोचितमिति॥ एतच्चोक्तं
प्राक्॥ स च सप्तविधः॥ तथा च गौडधृतो देवलः॥ षंढको वातजः॥ षंडः पंडः क्लीबो नपुंसकं
॥ कीलकश्चेति सप्तैव क्लीबभेदा व्यवस्थिताः॥ एषां स्वरूपमाह स एव॥ तेषां स्त्रीतुल्यवाक्चेष्टः
स्त्रीतुल्यः षंढको भवेत्॥ उन्नतकुचकूर्चहीनत्वादिधर्मक इत्यर्थः॥ पुमान् स्त्रीलाः स्त्रीलिंगा
नि प्रकाशितुं द्याद्यथैव च॥ स्त्री च पुंभावमास्थाय पुरुषाच्चार वर्जुणाः॥ वातजो नाम षंढः
स्यात् स्त्रीषंढोऽपि नामतः॥ लिंगानि स्त्रीपुंनपुंसकानि मिद्यात्तु मूनेत्॥ कदाचित्स्त्रीषु दृ

राम.
११३

249
1951

ष्टिसुमान् कदाचित्स्वं दृष्टस्यर्थः॥ स्त्री च पुरुषवच्चान्तरं तु के शुक्रो भंगविने व वातषंढ आह
सर्थः॥ असहिष्णुर्गोयषंढः स्यात् संडसुम्लानमेहनः॥ अमेध्यात्री पुमान् क्लीबो न हरेतान पुंस
कः॥ अमेध्यात्रीमुखमैथुनात्मरसज्ञोत्री॥ अयं वैद्यके आसेक्य इत्युक्तः॥ तदुक्तं सुश्रुते॥ आ
सेक्यो नाम भवतीदं पतोरस्य वीर्यपोः सद्यः कं प्राद्य जनते लिंगोच्छ्रायमसंशयं॥ स कीलक इ
ति प्रोक्तो यः क्लैमाद्यात्मनः स्त्रियं॥ अन्येन सह संयोज्य पश्चात्तामेव सेवते सुश्रुते तन्योपि यः पू
तियोनौ जायेत स सौगंधिकसंज्ञकः॥ स योनिशिफसौगंधमाघ्राय लभते बलं॥ स्वे गुदे मैथुना
द्यस्तु स्त्रीषु पुंवत् प्रवर्तते॥ कुंभीकः स तु विज्ञेयः ईर्ष्यकं शृणु चापरं॥ दृष्ट्वा व्यवायमन्येषां व्यवा
ये यः प्रवर्तते॥ ईर्ष्यकः स तु विज्ञेयः षंढकं शृणु पंचमं॥ यो भार्यायामृतौ मोहादंगनेव प्रवर्तते
॥ ततः स्त्रीचेष्टिताकारो जायते षंढसंज्ञितः॥ माधवीये तु चतुर्दशभेदा उक्ताः॥ तत्रैव ज्ञेयाः॥ ते
षां चोपनयनव्रतचतुष्टयसमावर्तनविवाहवर्जं सर्वे संस्काराः स्युरित्यूचुः॥ कुमारं जातमित्यादि

शू॰ ११८ संस्कार्यरूपी हेत्वपगतत्वेन पुंस्त्वस्याविवक्षया स्त्रीणामिव षंढस्यापि मन्त्रैः॥ तूष्णीमेताः क्रि
११८ याः स्त्रीणां विवाहस्तु समंत्रक इति याज्ञवल्क्योक्तेः॥ ते च स्त्रीतुल्यवाक्चेष्टाः स्त्रीधर्माणः क्ली
बा इति वृद्धमनूक्तेश्च॥ जलाद्यापगमप्रासादहरे वमतिप्रमहादानादिष्वप्येवं षाष्ठमायेन क
मश्रुतिगतस्य पुंस्त्वस्यापहेत्वपगतत्वेनाविवक्षया स्त्रीणामिवाधिकारात्॥ एवं सर्वशास्त्रेषु स्त्रीसा
देः साधारण्यात्क्वापि तु स्त्रादावेतु नाधिकारः॥ पश्चार्धहरः सपिंडदायी त्यापस्तंबेनार्थहरस्यैव
